॥ श्रीः ॥

अथ ।

लघुस्तवराजस्तोत्रम् ।

श्रीवैष्णवाचार्य श्रीश्रीनिवासाचार्यविरचितम्-
श्रीहयग्रीवानुग्रहजीवितस्वभूदेवपदानन्याश्रित पुरुषोत्तमप्रसाद
वैष्णवविरचित गुरुभक्तिमन्दाकिन्याख्यव्याख्योपेतम् ।

श्रीकृष्णायनमः ।
श्रीगुरुचरणेभ्योनमः ।

वन्दे श्रीश्रीनिवासार्य्यं वेदान्ताम्बुजभास्करम् ॥
प्रपन्नजनसन्त्राणलब्धदीक्षंजगद्गुरुम् ॥ १ ॥

इहखलु सकललोकस्य हितञ्चिकीर्षुर्भगवान्पाञ्चजन्यावतारो निरतिशयवात्सल्यकारुण्यादिगुणो निजाश्रितसंरक्षणलब्धदीक्षः श्रीश्रानिवासाचार्याभिधो ब्रह्मरुद्रेन्द्रादिकिरीटोडितपादपीठवेदान्तकवैद्यपरब्रह्मादिशब्दाभिधेयश्रीपुरुषोत्तमाज्ञयाऽवनितलावतीर्णं जगदुद्दिधीर्षुं तदचिन्त्यानन्तशक्त्युपबृंहितानन्तशक्तिं श्रीसुदर्शनावतारं नियमानन्दसमाख्यं ह्याद्याचार्यं निजगुरुं मिताक्षरेण स्तोत्रेण तुष्टाव, तस्य व्याख्यानं यथामति पदार्थमात्रेण निभाल्यते तत्प्रसादैकप्रयोजनेन,

जयजयेति-

जयजयेङ्गितज्ञाता नियमानन्द आत्मवान् ।
नियमेन वशे कुर्वन्भगवन्मार्गदर्शकः ॥ १ ॥

हेनियमानन्द त्वं जयजय स्वोत्कर्षमाविष्कुरु, आदरेवीप्सा, तत्र

शास्त्राचार्यसंस्कारशून्यान्कुतर्कनिष्ठान्नियमयति औपनिषदमार्गेस्थापयतीतिनियमः स्वाश्रितानानन्दयतीत्यानन्दः नियमश्चासावानन्दश्चेतिनियमानन्दः यद्वा नियमेनदेशकालादिपरिच्छेदशून्येनानन्दोयस्यसः सदास्वर्वत्रपरिपूर्णानन्दइत्यर्थः यद्वा चेतनाचेतनवस्तुजातं नियमयति स्वेस्वेकार्ये यथाधिकारं स्थापयतीतिनियमोविश्वान्तर्यामीभगवाञ्छ्रीवासुदेवस्तस्मिन्नानन्दोयस्यसः श्रीपुरुषोत्तमस्वरूपगुणादिविषयकानवच्छिन्ननिरतिशयानन्दाश्रयइत्यर्थः यद्वा निःशेषेणयमोनियमः निःशेषेणबुद्ध्यादीनामुपरमः समाधिः तेनानन्दोयस्यसः सदासमाध्यानन्दपूर्णइत्यर्थः यद्वा निःशेषेणयमयति स्वाज्ञायां प्रवर्त्तयति जीवानितिनियमोवेदस्तस्यापिवेदस्यानन्दोयस्मात्तथोक्तोनियमानन्दः वेदस्ययथार्थव्याख्यानंतत्प्रवर्त्तनञ्चैवानन्दहेतुः तदर्थमेवास्यावतारत्वादित्यलं विस्तरेण तस्य संबोधनमेतत्, ।

तमेवविशिनष्टि ।

इङ्गितज्ञातेति ।

श्रीभगवत इङ्गितम् इदानीमेव तदाज्ञाकरणीयतया प्रवर्त्ततइति जानातीतिसः यद्वा जीवानामिङ्गितम् अनेनोपायेनाऽसौ कृतार्थः स्यात् असौ सकामः असौ निष्कामः असौ मायया मां भजति असौ श्रद्धाविश्वासार्जवादिना भजतीत्यादि तत्तच्चेष्टितं जानातीति तथा चेष्टितस्य ज्ञातेति वा विग्रहः सर्वज्ञत्वात् ।

सर्वज्ञत्वेहेतुमाह—

आत्मवानिति ।

आत्माशब्दोऽत्र ब्रह्मवाचकः "तस्माद्वाएतस्मादात्मन आकाशः सम्भूत" इत्यादिश्रुतेः स प्रत्यक्षेणविद्यतेयस्यसः ब्रह्मज्ञएवसर्वज्ञः "आत्मन्परेदृष्ट" इत्यादिश्रुतेः यद्वा आत्मानो जीवात्मानोऽनवच्छिन्नानुभूतिविषयतया विद्यन्ते यस्य स तथोक्तः तच्चेष्टितज्ञानाभावेबोधकत्वासम्भवात् अतएव भगवन्मार्गदर्शकइति द्रष्टुरेवदर्शकत्वनियमात् असौसद्योमोक्षाधिकारी असौचिरकालेन साधनसंपत्त्या मोक्षभागी भविष्यति असौ भगवद्भागवतद्वेष्टा नित्यसंसारी औपनिषदैरुपेक्षणीय इति ज्ञात्वैव तदनुसारेण तत्तत्साधनेषु स्थापयित्वा भगवदीयमार्गं दर्शयतीति तथा

"येनाक्षरम्परमंवेदसत्यं प्रोवाचतांत्वतो ब्रह्मविद्या"मिति श्रुतेः किं कुर्वन् नियमेनवशेकुर्वन्निति नियमोऽत्रनियमनरूपसामर्थ्यविशेषः तेन तान् क्षेत्रज्ञान् वशेकुर्वन्वा ऽनुग्रहविषयीकुर्वन् यद्वा नियमेन शरीरवाङ्मनोव्यापाराणां देशकालादिपरिच्छेदशून्यतया भगवदाज्ञापालनात्मके परभक्तियोगे नियमनं नियमस्तेन श्रीहरिंवशेकुर्वन्नित्यर्थः भगवन्तं वशीकृत्वा तद्द्वारेण तेषां बुद्धिं प्रेरयित्वा भगवन्मार्गदर्शकस्तदुपदेष्टा भवतीति तात्पर्यार्थः अन्तःप्रेरणया विना तदन्तर्निष्ठाभावेनोपदेशमात्रस्य कार्यकारित्वायोगात् भगवन्मार्गोऽत्र साधनोपदेशकमस्तस्य दर्शकः यथाऽधिकारमुपदेष्टेतियावत् भगवन्मार्गोऽर्चिरादिमार्गो वा सचाऽध्यात्मसुधातरङ्गिण्यां विस्तृतः यद्वा मृग्यते शास्त्राविचारेण योगादिसाधनैश्च कृत्वा मुमुक्षुभिरिति मार्गस्तत्स्वरूपगुणरूपादिः "सोऽन्वेष्टव्य"इति श्रुतेः यद्वा नियमेनेति निग्रहानुग्रहरूपनियमनशक्तियोगेन सर्वामपि जीवात्मनो वशे कुर्वन् भगवन्मार्गे प्रवणीकारः तत्र स्वाश्रिताननुग्रहेण वाहिर्मुखांश्च निग्रहेण ।

तथा च वक्ष्यते ॥

निग्रहानुग्रहाभ्यां वै श्रीकृष्णेन समानतेति ।

भगवत्स्वरूपगुणादिविषयकसाक्षात्कारानुभूतिकारितेतियावत् तत्र स्वरूपे सर्वव्यापकःसर्वात्मा सर्वाधारो जगद्योनिः शास्त्रैकवेद्यो देशकालादिपरिच्छेदशून्यः सच्चिदानन्दोऽनन्त इति "सर्वव्यापी सर्वभूतान्तरात्मा यस्मिल्लोकाः श्रिताः सर्वे" "यतो वा इमानि भूतानि जायन्ते" "सर्वे वेदा यत्पदमामनन्ति" "सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानमानन्दं ब्रह्मे"त्यादि श्रुतिभ्यः, गुणाश्च ज्ञानशक्तिबलैश्वर्य्यादयो वात्सल्यकारुण्यक्षमादयश्च स्वाभाविकाः कल्याणरूपा यावदात्मवृत्तिसंख्यादिपरिच्छेदशून्याः "परास्यशक्तिर्विविधैवश्रूयते स्वाभाविकीज्ञानबलक्रियाच"-"यः सर्वज्ञः सर्ववित्" ।

समस्तकल्याणगुणात्मकोऽसौ तेजोबलैश्वर्यमहाववोधः ।
स्ववीर्यशक्त्यादिगुणैकराशिः ।
इत्यादिश्रुतिस्मृतिभ्यश्च ॥

आदिनासर्वमङ्गलाविग्रहः "यदापश्यः पश्यतेरुक्मवर्णंयदात्मको-

भगवान् तदात्मिकाव्यक्तिः" "हिरण्यकेशः हिरण्यश्मश्रुराप्रणखात्सुवर्णः" इत्यादि श्रुतिभ्यः ।

तद्विस्तारश्च श्रुत्यन्तकल्पवल्ल्यां द्रष्टव्यः ।

अथ

यस्यदेवेपराभक्तिर्यथादेवे तथा गुरौ ।
तस्यैतेकथिताह्यर्थाः प्रकाशन्तेमहात्मनः ।

इत्यादिश्रुतिबोधितभगवद्भावप्रतिपादकोऽप्ययं श्लोको व्याख्यायते हे नियमानन्द इति ।

चेतनाचेतनात्मकं जगन्नियमयतीति नियमोविश्वान्तरात्मा भगवाञ्छ्रीपुरुषोत्तमः-"आत्मानमन्तरोयमयत्येषते आत्मान्तर्यामी" तिश्रुतेः, आनन्दयत्यानन्द आनन्दस्वरूपोवेति "एष आनन्दयति" "विज्ञानमानन्दं ब्रह्मे"त्यादिश्रुतेः, नियमश्चासावनन्दश्चेतितथोक्तः सर्वान्तरात्मानन्दरूपो भगवान्वासुदेव इत्यर्थः तस्य सम्बोधनमिदम् अत एव इङ्गितज्ञातेति, सर्वान्तरात्मत्वादेव सर्वस्येङ्गितस्य बाह्याभ्यन्तरचेष्टितस्य ज्ञाता तस्यार्जवकौटिल्यादिचेष्टितं तत्तदनुकूलप्रापणं तत्तद्भोगफलं च सर्वं साक्षात्पश्यतीति यावत्, एतेन श्रीभगवतो विश्वान्तरात्मत्वं तत्समानाधिकरणं स्वातन्त्र्यं सार्वज्ञं च प्रतिपादितं, तेनैव च व्यतिरेकमुखेन जीवात्मनां तदात्मीयत्वं तत्परतन्त्रत्वमल्पज्ञत्वं चापि फलितम् ।

अथ सिद्धान्तमपि समासतो दर्शयन् विशिनष्टि ।

आत्मवानिति ।

आत्मानस्त्रिविधा अपि नित्यमुक्तबद्धविशेषयुक्ताः क्षेत्रज्ञास्तदाधेयतत्तन्त्रतद्व्याप्यतदात्मकत्वादिभ्यस्तदात्मीया विद्यन्ते यस्य स आत्मवानिति विग्रहःतदाधेयत्वादिभिः स्वरूपेण भिन्नत्वमपि जगतस्तदात्मकत्वादिना तदपृथक्सिद्धत्वादभिन्नत्वं भिन्नाभिन्नत्वमित्यर्थः किञ्च प्रकृतिप्रत्यययोः प्रत्ययार्थस्यैव प्राधान्यात् प्रकृत्यर्थानां क्षेत्रज्ञानां परतन्त्रसत्तायोगः "यदासीत्तदधीनमासी"दित्यादि श्रुतेः, प्रत्ययार्थस्य च श्रीमाधवस्य भगवतः कृष्णस्य स्वतन्त्रसत्तायोगो मुख्यवृत्त्यैवसिद्धः "आत्माहिपरमः स्वतन्त्रोऽधिगुणः" "एतस्य वाऽक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत इत्यादिश्रुतेः ।

प्रत्यग्ब्रह्मणोः संबन्धसिद्धान्तं निरूप्य तत्प्राप्तिसाधनमपि स्व-

यमेवेत्याह—

भगवन्मार्गदेशक इति ।

भगवतः स्वस्य वेदमुखोक्तस्वप्राप्तिमार्गं वैदिकसम्प्रदायानिष्ठसदाचारनिष्ठसदाचार्याभिगमनादिप्रभृतिस्वप्राप्तिपर्यन्तसाधनक्रमतदनुष्ठानादिरूपं मार्गं दर्शयतीति तथोक्तः वात्सल्यकारुण्यदयातितिक्षादिस्वाभाविकानन्तकल्याणगुणवरुणालयत्वात् स्वयमेवजन्मसमये कृपार्द्रकटाक्षेणावलोक्य सात्विकश्रद्धाविशिष्टं कृत्वा वेदान्तसम्प्रदायाचार्येणाऽऽत्माऽपरमूर्त्तिना वहिर्यामिणा ऽभिसङ्गम्य तदुक्तसाधनसंतति*माचारयित्वा स्वात्मानं प्रापयतीति भावेनाह ।

नियमेनवशेकुर्वन्निति ।

तत्तत्साधनाचरणाद्यनुकूलानुग्रहगर्भितान्तःप्रेरणात्मकेन स्वासाधरणधर्मेणवशेकुर्वन् स्वानुकूलत्वं स्थापयन्नित्यर्थः"यमेवैषवृणुते तेनलभ्यः तमक्रतुं पश्यतिवीतशोकोधातुः प्रसादान्महिमानमात्मन"इत्यादिश्रुतेः, यद्वानियमोत्र नियमनं निग्रहणरूपासाधारणैश्वर्ययोग इति "भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम" इति श्रुतेः, तेन दुराचारान्वेदानिषिद्धार्थानिष्ठान् निग्रहाधिकारणे निग्रहेण वशे कुर्वन्नित्यर्थः तथा च दुष्कृतां निग्रहेण वेदोक्तधर्मप्रवृत्तिविरोधं परिहरन्साधूनां वदोक्तधर्मानुगामिनां चानुगृह्णन् तेभ्यो भगवन्मार्गं पूर्वोक्तं मार्गं वेदोक्तसाधनसन्ततिं भगवद्गीताद्युपदेशरीत्या वाऽर्चिरादिरूपं स्वप्राप्तिमार्गं वा दर्शयतीति वाक्यार्थः एतदर्थमेव भगवतोऽवतारत्वात् ।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ॥
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ॥
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ।
इति भगवदुक्तेः ॥

एवं भूतैश्वर्याद्याश्रयस्त्वं स्वोत्कर्षमाविष्कुरु इति संबन्धः ॥१॥

एतेन श्लोकेनोत्कर्षप्रादुर्भावार्थं प्रार्थना उक्ता तत्प्रार्थनया तुष्टेन स्वबुद्धौ प्रादुर्भावितमुत्कर्षं ज्ञात्वा तदेव वर्णयति ।

---

* आचारयित्वेति पाठः प्रामादिकः ।

स्वरूपगुणकर्मादिभिरुत्तमत्वमेवोत्कर्षस्तस्यैववर्णनार्थमुपक्रमते।

पाखण्डद्रुमषण्डानां दाहकः पावकोपमः ॥
गर्वपर्वतदम्भोलिः काम्यकर्माहिपक्षिराट् ॥ २ ॥

पाखण्डाएवद्रुमास्तेषां षण्डाः समूहास्तेषां दाहक इति, वृक्षाणां छेदेपि अङ्कुरादिना पुनरपि रोहदर्शनात्तथा दण्डादिभिया पाखण्डत्यागेपि वासनया दुस्त्यजत्वात् तद्दुर्निवृत्तत्वात् द्रुमत्वोक्तिः, दवाग्निना वनदाहेपि क्वचित्क्वचित्तत्तन्मूलावशेषदर्शनात्पुनस्तद्रोहदर्शनाच्च तथापि पाषण्डानां दाहे तन्मूलावशेषात्कदाचिद् भूयः प्ररोहो भविष्यतीत्याह, पावकोत्तम इति, सांवर्त्तकाग्नितुल्यः समूलवस्तुदाहकत्वाच्च भूयः प्रादुर्भावसम्भावनेत्यर्थः।

किंच,

गर्वपर्वतदम्भोलिरिति ।

गर्वा एव दुरुच्छेद्यत्वात्पर्वतास्तेषांछेदने दम्भोलिर्वज्रः वज्रतुल्यइत्यर्थः स्वाश्रितानां गर्वस्यात्मप्राप्तौ मुख्यप्रतिबन्धकस्य स्वानुग्रहेण सद्योनाशकइत्यर्थः यद्वा शास्त्रमार्गबहिर्मुखानां गर्वपर्वतान् निजैश्वर्ययोगात् तन्निग्रहेण सद्योनाशयतीति तात्कालिकनाशकत्वद्योतनाय दम्भोलिशब्दप्रयोगः।

किञ्च,

काम्यकर्माहिपक्षिराडिति।

"स्वर्गकामो यजेत" "पशुकामोयजेत" इत्यादिकाम्यस्वर्गादिविषयोद्देशेनतत्साधनतया विधीयमानानि काम्यकर्माणि तदनादिवासनाश्चाऽहिस्थानानि यथाहि दृष्टस्य परमजाड्यापत्त्या ज्ञानसामान्याभावः तद्दंशनस्येव तेषामपि श्रेयोज्ञानाभावासाधारणहेतुत्वात् तन्नाशे पक्षिराडिव, यथा पक्षिराड्वैनतेयस्य नामात्मकमन्त्रोच्चारणादहयो भुजगाः पलायन्ते तद्दंशजन्यविषमपि सद्योनश्यति किं पुनस्तत्साक्षात्कारेण, एवं तस्य सामान्यदृष्ट्यापि काम्यकर्मणां सवासनानां निवृत्तिः किं पुनस्तद्विशेषसंबन्धजन्यतदनुग्रहया दृष्ट्या तन्निवृत्तिरिति कैमुत्यन्यायदर्शनार्थमिदमुपमानमित्यर्थः, अत्र काम्यपदप्रयोगेन नित्यनैमित्तिकयोः परम्परया मोक्षोपयोगित्वात्कर्त्तव्यतासूचिता, अस्य वि-

शेषनिर्णयश्च वेदान्तरत्नमञ्जूषायां श्रीपुरुषोत्तमाचार्यपादैर्विस्तृतः अत्रोपरम्यते ॥ २ ॥

किञ्च मत्तवादगजेन्द्राणां पञ्चाननमहोज्वल इति ।

मत्तवादगजेन्द्राणां पञ्चाननमहोज्ज्वलः ॥
कामादिविषयाब्धीनां शोषकः कुम्भसम्भवः ॥ ३॥

अनेककुतर्ककुशलानां स्वकपोलकल्पिता वादा एव गजेन्द्राः मत्ताश्चते वादगजेन्द्राश्चेति विग्रहः, मत्तवादीतिपाठे वादिनो देहेन्द्रियमनोबुद्धिप्राणाद्यात्मवादिनः भूतसङ्घातकारणवादिनो नास्तिकाः, कर्मकालपरमाणुप्रकृत्यादिकारणवादिनो मीमांसकतार्किकादयश्च, अध्यासवादिनो मायावादिनश्च, तएव गजेन्द्राः मत्ताश्चतेवादिगजेन्द्राश्चेति पूर्ववद्विग्रहः उत्कृष्टमन्यानाम् उत्कृष्टताख्यापने गजेन्द्रोपमानं तेषां पराभवे पञ्चाननमहोज्ज्वलः साक्षाच्छ्रीनृसिंहोपमः, यथा सामान्यनृसिंहस्य नाममात्रमपि श्रुत्वा गजेन्द्रा दूरतः पलायन्ते किं पुनः श्रीनृसिंहस्य, तथा तस्यवाग्विलासमात्रश्रवणेनैव सर्वे वादिन आत्माभिभवं निश्चिन्वाना दिशो द्रवन्तीति तात्पर्यार्थः ।

किञ्च,

कामादिविषयाब्धीनां शोषकः कुम्भसम्भव इति ।

आदिशब्दः क्रोधलोभमोहमदमात्सर्यविषादशोकादिसङ्ग्रहार्थः कामादिविषया एवाब्धयः वासनाबाहुल्येनाऽगाधत्वात् दुस्तरत्वाच्चोपमानम्, एकैकस्यापि तथात्वाद्बहुवचनं, तेषां शोषकः, तत्रोपमानं कुम्भसम्भव इति, सद्योऽप्रयासेन शोषणमात्रे एवोपमा, यथा श्रीदाशरथिना रावणोहतः, श्रीभगवता वासुदेवेन रुद्रेन्द्रादयः पराजिता इत्यादिस्तुतिः, संकल्पमात्रेण निमिषार्द्धेप्यनन्तकोटिब्रह्माण्डोत्पादनादि कर्त्तुं समर्थस्य कियदेतत्स्तवनं, तथा प्रकृतेऽपि बोध्यम्, क्षमया पृथिव्री सम इत्याद्युपमानवत् ।

वस्तुतस्तु कामादिनिवारणं कुम्भसम्भवस्यापि दुष्करं बद्धकोटित्वात्प्रारब्धपरतन्त्रत्वाच्च, भवतस्तु न किञ्चिदपि दुर्लभं साक्षाद्भगवत्करस्थसुदर्शनावतारत्वात् ॥ ३ ॥

किञ्च ।

भक्त्यौषधिलतानां च पोषकश्चन्द्रशीतल इति ।

भक्त्यौषधिलतानां च पोषकश्चन्द्रशीतलः ॥
संप्रदायप्रबोधाय दीपको ध्वान्तनाशकः ॥ ४ ॥

यथा प्राणिनां यवव्रीह्याद्यौषधयो जीवनहेतवः तथाश्रेयस्कामानां हरिभक्तिरेव जीवनौषधिरिति तात्पर्येणौषधिरूपणं, भक्तिरेवौषधिस्तस्य लतानां पोषकश्चन्द्रवत् शीतलः सदाविर्भूतस्व स्वरूपपरस्वरूपानन्दाश्रयत्वात्, "सदापश्यन्ति सूरय" इति श्रुतेः,

किञ्च,

सम्प्रदायप्रबोधायेति ।

सम्प्रदायविषयकप्रबोधाय ज्ञानाय सम्प्रदायानुगामिभ्यस्तद्विषयकज्ञानप्रकाशनार्थं तन्निरूपितसिद्धान्तविषयकज्ञानप्रतिबन्धकावरणनाशार्थं दीपकः, तत्र हेतुः ध्वान्तनाशकः, दीपकस्य तमोनाशकत्वं स्वभावत एव सिद्धमित्यर्थः, "येनाक्षरं परमं वेद सत्यं प्रोवाचतां तत्वतो ब्रह्मविद्याम्" ।

सुदर्शनमहाबाहो सूर्यकोटिसमप्रभ ।
अज्ञानतिमिरान्धानां विष्णोर्मार्गं प्रदर्शय ।
इत्यादिश्रुतिस्मृतिभ्यः ॥ ४ ॥

किञ्च ।

संसारकूपमग्नानांकरावलम्बनदायक इति ।

संसारकूपमग्नानां करालम्बनदायकः ॥
सुशीतलमना नित्यं माधुर्येण विराजते ॥ ५ ॥

संसारएव कूपवदुद्धरणाशक्यत्वात्कूपस्तत्र मग्नानां जीवानां करावलम्बोभागवतधर्म उद्धरणहेतुत्वात्तस्य दायकः तदुपदेष्टृत्वात्-

तथाचशान्तिपर्वणिभीष्मः ।
गजेन कश्चित्पुरुषः कानने समभिद्रुतः ।
जिघांसाभयसंत्रस्तः प्रविवेश महद्वनम् ।
अथ पश्यति तत्रस्थं सिंहयूथमवस्थितम् ।
तं दृष्ट्वा स निवर्त्तेत दिशमन्यामधावत ।
तत्राऽपश्यत् खड्गहस्तां भीमकन्याञ्च दारुणाम् ।

आधावन्तीमभिमुखं तिष्ठतिष्ठेति चाऽब्रवीत् ।
तां दृष्ट्वा स निवर्त्तित्वा दिशमन्यामधावत ।
तस्यामपश्यत्तत्रस्थं प्रदीप्तवनमग्निना ।
स तत्र चिन्तयामास अहोकष्टमवस्थितम् ।
इतो गज इतः सिंह इतः कन्यान्वितो दवः ।
निराशां जीविते प्राप्तस्तत्र कूपमपश्यत ।
कक्षायतनमत्यन्तमन्धकारमनन्तकम् ।
स तत्र कूपे पुरुषः पपात भयपीडितः ।
अथाऽलोकयत त्रस्तः सर्पं कूपतले स्थितम् ।
विजृम्भमाणं घोरास्यं श्वसन्तं लेलिहाननम् ।
वल्लीमादाय राजेन्द्र तलेऽतिष्ठदधोमुखः ।
अलाबूरिव तत्रासौ तस्यां वल्ल्यां प्रलम्बितः ।
तस्या वल्ल्यास्तु मूलानि व्यच्छिनत्तत्र मूषकः ।
उपद्रवास्तु तत्रान्ये दंशका मत्कुणादयः ।
तत्राप्यन्यद्रसोत्पन्नं क्षौद्रं मधुकराक्षतम् ।
तप्तं तच्चाल्यमानं तु घृष्यमाणमभिद्रुतम् ।
अपिबन्मधु तत्रस्थः पतितं तस्य मूर्द्धनि ।
पतितं मस्तके तस्य मधु तन्मुखमाविशत् ।
पतितं मस्तके सर्वमपिबत् स पिपासितः ।
यथा स पुरुषो वत्स घोरे वर्त्तति सङ्कटे ।
तथा शरीरिणः सर्वे घोरे वर्त्तन्ति संशये ।
अस्य विवरणम् ।
योऽसौ गजो महावीचिर्विद्धि देहि हिताहितम् ।
सिंहान् रोगान्विजानीहि विहाराहारसम्भवान् ।
असिहस्ता तु या कन्या सा जरा दुरतिक्रमा ।
यो दवाग्निः स शोको वै लोभमोहभयाश्रयः ।
कूपस्तु मानुषो लोकः कालो जगदुपद्रवः ।
आयुर्वल्ली तथा प्रोक्तं मूषको मृत्युरुच्यते ।
योऽसौ कूपतले सर्पः समयः काल उच्यते ।
कामं मधुरसं विद्धि संशयो नाऽत्र विद्यते ।
मधुनश्चापि यत्स्वाद्यं कामस्वादो हि स स्मृतः ।

एवं श्रुतगुणो वत्स धर्मोत्कृष्टमतिर्भव ।
संशयेनाऽजितात्मा त्वं मोक्षं यासि यथाक्रमम् ।
एवं संसारकूपस्य धर्म एव परा गतिरिति ।
एवं भूते संसारकूपे मग्नानां करावलम्बं भागवतधर्मं दत्वा तदुद्धारको भवानिति वाक्यार्थः ।

किञ्च सुशीतलमना इति ।

सुष्ठु शीतलं कामादिजन्यतापास्पृष्टमाहात्म्यकं मनो यस्य सः नित्यमुक्तत्वात् तत्कारणकर्मप्रयुक्तप्रकृतिसंबन्धाभावात् ।

अत एव माधुर्येण गुणेन मधुरालापादिना नित्यम् एकरसं यथास्यात् तथा विराजते विशेषेण प्रकाशते ॥ ५ ॥

किञ्च सुखदातेति ।

सुखदाता भवच्छेत्ता तापत्रयविनाशकः ॥
श्रीकृष्णपूजनानन्दी सर्वदा शुद्धवेषवान् ॥ ६ ॥

सुखस्य परमानन्दभगवद्भावापत्तिलक्षणमोक्षाख्यस्य, तत्र द्वारमाह-

भवच्छेत्तेति

भवस्य प्रकृतिसंबन्धनिरूपितजन्ममरणादिचक्रभ्रमणरूपस्य छेत्ता ध्वंसक इति,

अत एवतापत्रयविनाशकइति,

तापा आध्यात्मिकाधिभौतिकादित्रिविधाः, आद्यंद्विविधं शारीरं मानसञ्चेति, शिरोरोगज्वरातिसारामयाक्षिपीडादिकं शारीरं, कामक्रोध द्वेषलोभमोहशोकासूयावमानेर्ष्यादिजन्यं मानसं, मृगपक्षिमनुष्यराक्षससर्पादिजातमाधिभौतिकं, शीतोष्णवातवर्षाजलविद्युदादिसमुद्भवम् आधिदैविकमिति विवेकः,

किञ्च श्रीकृष्णपूजनानन्दीति,

श्रीकृष्णस्य पूजनेनानन्दोयस्यास्तीति, तथा पूजाचात्र सर्वदेशकालाद्युचिततत्तत्सङ्कल्पानुकूलाचार इति परमभक्तिरिति यावत् ।

किञ्च सर्वदाशुद्धवेषवानिति ।

सर्वस्मिन्काले परमधामावस्थानेवाऽवतारावस्थायां वा शुद्धोऽप्राकृतोवेषोयस्यसः नित्यमुक्तत्वेनप्रकृतिसम्बन्धशून्यत्वात् ॥ ६ ॥

अथ प्रेमभक्तिमत्त्वं दर्शयन्नाह—
आनन्दाश्रुकलापूर्ण इति ।

आनन्दाश्रुकलापूर्णः सानुरागसुधान्वितः ॥
अहंममेति दौर्जन्यनाशको बुद्धिदः स्वयम् ॥ ७ ॥

यतः सानुरागसुधान्वितः अनुरागेणसहिता सानुरागा भगवत्स्वरूपगुणादिविषयकाप्रीतिः सैवसुधा तयाऽन्वितः सम्पन्नः उक्तलक्षणनिरतिशयप्रतीतेरेकाश्रय इत्यर्थः ।
स्वाश्रितसर्वदोषसमूलहारित्वमनुसंदधदाह ।
अहंममेतिदौर्जन्यनाशक इति ।
देहादावहमिति पुत्रवित्तादौममेति दौर्जन्यंदुर्जनानांरिपूणांभावोवैरिभावमिति यावत् आत्मनैवात्मनाशकत्वं, यद्वा अहमिति आत्मनिस्वतन्त्रसत्तावच्छिन्नाहंत्वनिश्चयः, वस्तुतः आत्मनांतदात्मकतयापुरुषोत्तमस्यैवाहंप्रत्ययस्य प्रधानाविषयत्वात्, तथैव देहादौममेति "यस्मिन्निन्द्रोवरुणोमित्रोदेवा ओकांसि चक्रिरे" इत्यादिभ्यः, तथाभूतां व्यवसायात्मिकां बुद्धिं स्वयमेवदत्वोक्तसंसरणहेतोर्दौर्जन्यदाम्भिकत्वाद्यात्मरिपोर्विपरीतज्ञानान्मोचयतीति वाक्यार्थः,

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।
तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति—
श्रीमुखोक्तेः ।

अत्र बुद्धिप्रदानं बहिर्यामिशास्त्राचार्यमुखेन तदुक्तानुभावनं तद्विपरीतभावनाशनं चाऽन्तर्यामिरूपेणविश्वबुद्धिनियन्त्रेतिविवेकः॥७॥
स्वाश्रितदोषनाशकत्वं निरूप्य तेषां पोषकोऽपि सएवेत्याह—
स्वस्य लावण्यमाधुर्यपोषकश्चाऽनुवर्त्तिनामिति ।

स्वस्य लावण्यमाधुर्यपोषकश्चानुवर्त्तिनाम् ॥
नितरां शाठ्यहर्त्ता च धाता सर्वभयापहः ॥ ८ ॥

अनुवर्त्तिनां स्वाश्रितानन्यभक्तानां तदाज्ञानुवृत्त्येकजीवनानां

स्वस्य लावण्यमाधुर्याभ्यां पोषकोभरणपोषक इति योगक्षेमकर्त्तेतियावत्, अप्राप्तप्रापणंयोगः प्राप्तस्य पालनं क्षेमइति विवेकः अप्राप्तानां श्रेयोऽसाधारणहेतूनां ज्ञानभक्तिविरागादीनां प्रापकत्वात् प्राप्तानां च तेषां तद्विरोधिभ्यः कामक्रोधादिनिरयासाधारणहेतुभ्यस्तद्रिपुभ्योरक्षकत्वात् योगक्षेमकर्त्तृत्वसिद्धिरित्यर्थः।

तत्प्रकारमाह—

स्वस्येति।

नित्याश्रिताभ्यां स्वाभाविकयावदात्मवृत्तिभ्यां सद्गुणाभ्यां लावण्यमाधुर्याभ्यां तत्र लावण्यं वाचः सौन्दर्यं माधुर्यं मधुरभाषया मनोहारित्वमिति विवेकः यद्वा रूपवृत्तिसौन्दर्यमाधुर्याभ्यां मनोनयनाह्लादजनकतयास्वाश्रितानां पोषक इति।

योगक्षेमवाहकत्वमेवाह विशेषणाभ्याम्—

धातेति।

मातृपितृवत् धारणपोषणकर्त्ता सर्वसम्बन्धविषयत्वात् एतेनयोगकर्त्तृत्वमुक्तं धारणसामग्रीप्रापणयोगत्वात्।

सर्वभयापह इति।

मोक्षसामग्रीदैवीसम्पद्धारिणाम् आसुरीसम्पदास्थरिपूणां दस्युभूतानां कामादीनां सर्वभयमपहन्तीति तथा सः नितरामपदस्य सर्वैरपिप्रथमान्तपदैरन्वयोबोध्यः, अत एव शाठ्यहर्त्तेति शठस्य भावः शाठ्यं परवञ्चकत्वधौर्त्यादिदोषास्तेषां हर्त्तृत्वेनक्षेमकरणत्वमुक्तम्।

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहमिति।
श्रीमुखोक्तेः ॥ ८ ॥

अथ गुणान्तरदर्शनेनस्तौति—

अमानीति।

अमानी मानदो मन्यो भावको भावधारकः ॥
सर्वसंशयभेत्ता च सर्वागमविशारदः ॥ ९ ॥

मानोऽभिमानः देहादावात्मत्वाभिमानः सविद्यतेऽस्येतिमानीनिमानी अमानी नित्यं स्वपरविषयकपरोक्षानुभूतिमत्त्वात्

तत्कारणप्रकृतिसम्बन्धशून्यत्वाच्च "सदापश्यन्तिसूरय" इति श्रुतेः।

अत एवमानद इति, ।

स्वाश्रितानामुक्तलक्षणं मानमभिमानं द्यतिखण्डयतीति तथोक्तः, यद्वामानं प्रमाणं श्रीपुरुषोत्तमस्वरूपगुणादिविषयकप्रमाकरणं वेदान्तलक्षणं स्वचरणप्रपन्नेभ्यो ददातीतिसः, यद्वा मीयते हिंस्यते ऽनेनेतिमानम् अनादिपुण्यापुण्यरूपंसंसरणमूलभूतं कर्म द्यतिखण्डयतीतिसः, स्वजनकर्मात्मकाविद्यानाशकइत्यर्थः,

अत एव मान्यइति,

श्रेयोर्थिभिः साधुभिर्नितरांपूज्यः आश्रयणीय इत्यर्थः,

किञ्च भावक इति,

स्वभक्तान् भावयति ज्ञानवैराग्यादिसम्पत्त्या वर्द्धयतीति भावकः,

किञ्च भावधारक इति,

भावं भगवद्विषयकं प्रेम धारयतीति तथा,

असाधारणमाचार्यलक्षणं निरूपयन्स्तौति,

सर्वसंशयभेत्ताचेति,

सर्वेषां संशयान् सर्वान्संशयान्वा भिनत्तीतिसः, संशयास्तावद्विविधा आत्मपरमात्मसाधनफलादिविषयभेदात्, तथा हि भगवन्कोऽहं देहेन्द्रियमनोबुद्धिप्राणादिष्वेकतमस्तदन्योवेति स्वाश्रितेन पृष्टेउत्तरम् त्वंदेहो न भवसिजडत्वात् उच्छित्तिधर्मत्वात् मृतेचैतन्यादर्शनाच्च देहस्य घटादिवत्, नापीन्द्रियसंघातः करणत्वात् भौतिकत्वात् स्वप्नेलयदर्शनाच्च स्थूलदेहवत् दण्डचक्रादिवद्वा, अत एव नमनोबुद्धिश्च करणत्वाविशेषात् सुषुप्त्यादिष्वननुगतत्वाच्चेन्द्रियादिवत्, प्राणोपिन वायुत्वात् जन्यत्वाच्च व्यजनजन्यवायुवदिति, तस्मादेहेन्द्रियमनोबुद्ध्यादिजडवर्गविलक्षणो जाग्रदाद्यवस्थातीतस्तत्तदवस्थाप्रकाशको ज्ञाताहमर्थाभिन्नश्चेतनस्वरूपो ब्रह्मात्मकस्तदधीनस्वरूपस्थितिप्रवृत्तिकोऽणुपरिमाणकः प्रतिदेहं भिन्नो बन्धमोक्षार्हः प्रत्यगात्मा त्वमसीतिसङ्केपः, विशेषस्तु वेदान्तरत्नञ्जूषायां श्रीपुरुषोत्तमाचार्यपादैर्निरूपितः, किञ्च किं वा जगत्कारणं परमाणवोवा कर्मवा कालोवा प्रकृतिर्वा परब्रह्मवेति संशये परमाण्वादीनां जडत्वात्स्वतन्त्रत्वेनकार्योत्पादनत्वासम्भवात्, ब्रह्मैवजगत्कारणं सर्वज्ञत्वेसति चेतनत्वात् श्रुति-

प्रमाणकत्वाच्च, "तदैक्षतबहुस्यां प्रजायेय नामरूपेव्याकरवाणि स्वयमात्मानमकुरुत सच्च त्यच्चाऽभवदि"त्यादि श्रुतेः, उक्तलक्षणसङ्कल्पेक्षणादीनामचेतनेष्वसम्भवादित्यर्थः, तत्कारणं सर्वविशेषशून्यं सर्वप्रमाणागोचरं ब्रह्म वा उपहितं वा अध्यासवद्वा सर्वज्ञसर्वाचिन्त्यानन्तस्वाभाविकयावदात्मवृत्तिगुणशक्तिको वेदान्तैकवेद्यः श्रीपुरुषोत्तमोवेति संशये निर्विशेषस्य प्रमाणाभावेनैवासिद्धत्वात् निर्विशेषं वस्तु मिथ्या सर्वप्रमाणाविषयत्वात् शशशृङ्गादिवदित्यनुमानात् उक्तेक्षणादीनां निर्धर्मके वस्तुन्यसम्भवाच्च निर्विशेषंनजगत्कारणं ईक्षणादिधर्माणामाश्रयत्वात्प्रकृत्यादिवदित्यनुमानाच्च, नाप्युपहितं निर्धर्मकत्वसाम्यात् धर्मवत्त्वाभ्युपगमेतादवस्थ्यहानिप्रसङ्गात्, नापितृतीयं ज्ञानेऽज्ञानाध्यासासम्भवात् इतरेतरात्यन्तविरोधित्वाच्च सूर्येऽन्धतमोऽयोगवत्, तस्माच्चरम एव वेदान्तवेद्योमुक्तोपसृप्योयोगिध्येयो ब्रह्मरुद्रेन्द्रादिसुरर्षिगणेड्यमानोऽचिन्त्यानन्तस्वाभाविकस्वरूपगुणशक्तिकोऽस्पृष्टदोषमहात्म्यो भगवान्वासुदेवः परब्रह्मभूतः श्रीकृष्ण एव जगदभिन्ननिमित्तोपादानकारणमिति,"यः सर्वज्ञः सर्ववित्" "स्वाभाविकीज्ञानबलक्रिया च" "सत्यं ज्ञानमनन्तं ब्रह्म""यतो वा इमानिभूतानि जायन्ते" "सर्वे वेदायत्पदमामनन्ति" "ब्रह्मविदाप्नोति परं" "यं सर्वे देवानमन्ति" "मुमुक्षुर्वैशरणमहं प्रपद्ये"इत्यादिश्रुतिभ्यः, अथ किं वा मोक्षसाधनं कर्मैव वा कर्मज्ञानसमुच्चयो वा निर्विशेषप्रमाणातीतज्ञानं वा सर्वज्ञसर्वशक्तिपरमेश्वराविषयकं ज्ञानं वेति, नाद्यः कर्मणः कर्मलक्षणाज्ञानविरोधित्वाभावात् "प्लवाह्येते अदृढा यज्ञरूपा" इति श्रुतेः, तस्य परम्परयाज्ञानोत्पादनद्वारा श्रेयःपरत्वाभ्युपगमे इष्टापत्तिः, नापि द्वितीयः उभयोर्विरोधिनोरेकत्र समुच्चयानर्हत्वात् ।

ज्ञानाग्निः सर्वकर्माणि भस्मत्साकुरुतेतथे–ति,

श्री *मुखोक्तेः* ।

नापि तृतीयः तस्याज्ञानसाधकत्वाभ्युपगमात्, तस्मादुक्तलक्षणपरब्रह्मस्वरूपादिविषयकमेवज्ञानं मोक्षासाधारणं कारणं "जुष्टंयदापश्यत्यन्यमीशंतन्महिमानमितिवीतशोकः" "तमेववविदित्वातिमृत्युमेतिनान्यः पन्था विद्यतेऽयनाय" "पृथगात्मानंप्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेती"त्यादिश्रुति-

भ्यः. अथ किंवा फलं स्वर्गाद्यभ्युदयरूपं वा मोक्षो वा किंतावत्प्राप्तम् अभ्युदयमेवेति, "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृत"मित्यादिश्रुतिभ्यो अक्षयत्वादिविधानादितिराद्धान्तः, मोक्षएवफलंस्वार्थत्वात् निरतिशयत्वाच्च "नसपुनरावर्त्तते" अनावृत्तिशब्दात् ।

मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ।

इत्यादिश्रुतिस्मृतिसूत्रेभ्यः ।

नस्वर्गादीनांश्रेयस्त्वं क्षयिष्णुत्वात् "यथेहकर्मजि(चि)तोलोकः क्षीयते एवमेवामुत्रपुण्याजि(चि)तोलोकः क्षीयते" इत्यादिश्रुतेः, आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुनेति—

स्मृतेश्च ।

ननुद्वयोरपिवाक्ययोः श्रौतत्वेनप्रामाण्यसाम्यात् अक्षयबोधकश्रुतेरेव प्राबल्यम् किंनस्यादिति चेन्न. अक्षयत्वबोधकश्रुतेस्तर्कसहकृतत्वात् प्राबल्यम्, स्वर्गादिलोकाः क्षयिष्णवः कर्मजन्यत्वात् कृष्यादिवदितिप्रयोगात्, स्यादेतत् मोक्षएवफलं तथापि किं तस्यस्वरूपं तार्किकाणामेकविंशतिप्रकारदुःखात्यन्ताभावोवा जैमिन्याचार्याभ्युपगतसार्वज्ञादिब्राह्मधर्मापत्तिर्वा औडुलोम्यभिमतचिन्मात्रापत्तिर्वा सर्वाविरुद्धश्रीबादरायणाभ्युपगतभगवद्भावापत्तिर्वेति, नाद्यः अवैदिकत्वात् सुषुप्तावतिव्याप्तेश्च, नद्वितीयः चित्प्राप्तिविधायकवाक्यविरोधात्, नापितृतीयः "सर्वेहपश्यः पश्यती"त्यादिसार्वज्ञविधायकश्रुतिव्याकोपात्, तस्मादुभयश्रुत्यविरुद्धश्चरमपक्षएवश्रेयान् "एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायण" इति निर्णयसूत्रात्, अस्यार्थः एवं चोपन्यासात्पूर्वभावात् पूर्वोक्तब्रह्मभावात सार्वज्ञादिविषयकापरिच्छिन्नानुभवात् ब्रह्मभावापत्तिः अपहतपाप्मत्वादिसंपन्नविज्ञानघनीभूतस्वस्वरूपाविर्भावाच्चाऽविरोधं मोक्षस्वरूपं भगवान्बादरायणो मन्यते इत्यक्षरार्थः, एवं सर्वश्रुतीनां स्वार्थ एव प्रामाण्यात् नैकतमयापि श्रुत्या विरोधः,"निरञ्जनः परमंसाम्यमुपैति""सस्वराड्भवती"त्यादिश्रुत्या सार्वज्ञसाम्यविधानात्, सर्वज्ञसादृश्यस्यापि तत्र सत्वात् सर्वज्ञकल्पत्वमप्यविरुद्धम्, "सर्वेहपश्यः पश्यती"तिश्रुतेः, सादृश्यंनामतद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं, तथा च "मुक्तस्य जगद्व्यापारवर्ज"मितिशास्त्रात् स्वत-

न्त्रस्वरूपस्थित्याद्यर्हत्वेन तद्धिन्नत्वे सति सार्वज्ञादीनामपहतपाप्मत्वादीनां च भूयसां ब्रह्मधर्माणां तत्र योगात् परमसाम्यलक्षणसमन्वयः, स्वराड्साम्यात्स्वाराज्ययोगो ऽप्यविरुद्धइतिसंक्षेपः, किंच कोवा शास्त्रविषयः कर्मवा ब्रह्म वा किंतावत्प्राप्तं कर्मैव सर्वज्ञेन भगवता जैमिनिना तत्वविधानात् "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां" मित्यादिसूत्रात्, नन्वेव मपि "सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानमानन्दं ब्रह्म" "यः सर्वज्ञः सर्ववि"दित्यादिषु क्रियासंबन्धलेशस्यादर्शनात् कथमिव क्रियापरत्वं, न चातदर्थानामानर्थक्यस्य उक्तत्वात्कथंभूयोविकल्पाकावशइतिवाच्यं, तेषामपिश्रुतित्वाविशेषेणबाधायोगादध्ययनविधिविषयत्वाच्च, अन्यथाऽवैदिकत्वापत्तेर्दुवारत्वादिति चेन्न, तेषां क्रत्वङ्गकर्तृस्तवनपरत्वात्, अङ्गपरस्य वाक्यस्यान्ततोऽङ्गिन्येव पर्यवसानान्नबाधशङ्कावकाशइति प्राप्ते ब्रूमः, ब्रह्मण्येवशास्त्रस्यसमन्वयो न कर्मणितस्य जन्यत्वजडत्वपरतन्त्रत्वादियोगात्, न शास्त्रविषयं, प्रत्युततद्भावापत्तिलक्षणमोक्षोपायभूतज्ञानोत्पादने एव कर्मण उपयोगश्रवणात्, "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेनतपसाऽनाशकेने"त्यादिभिः,

सर्वकर्माखिलं पार्थज्ञानपरिसमाप्यते,

इति स्मरणाच्च,

एतेन पूर्ववाधशङ्कापिदूरतोनिरस्ता, विशेषस्तु आकरे द्रष्टव्यः, स्यादेतत्, अखिलस्यापिशास्त्रस्य ब्रह्मण्येवसमन्वयः, तस्यचतद्विषयत्वं, तथाऽपि कीदृशं ब्रह्म वेदान्तस्य विषयः, औपाधिकभेदाश्रयं वा, कल्पितभेदाश्रयं वा, केवलभेदाश्रयं वा, चिदचिद्विशिष्टं वा, स्वाभाविकभेदाभेदाश्रयंवेति, नाद्यः अनुपपन्नत्वात्, तथा हि सार्वज्ञादिस्वाभाविकधर्माश्रयस्य परब्रह्मण उपाधिना जीवभावापत्तिस्तत्वमस्यादिवाक्योपदेशजन्याभेदज्ञानात्तन्निवृत्त्याचमोक्षइति तस्य राद्धान्तः, अत्र प्रष्टव्यः, उपाधिना ब्रह्मणः सार्वज्ञादिधर्मा आवृताः, स्वरूपं वा, नाद्यः असम्भवात् तथा हि सार्वज्ञादयोधर्माः स्वाभाविका औपाधिकावा नान्त्यः, औपाधिकत्वे उपाधेस्सत्वमसत्वं वा, सत्यत्वेऽपि ब्रह्माभिन्नत्वमभिन्नत्वं वा, भिन्नत्वेस्वप्रयुक्तोऽन्यप्रयुक्तो वा, ब्रह्मप्रयुक्तो वा, नाद्यो वक्तुं शक्यः, आत्माश्र-

यात्, नापि ब्रह्मप्रयुक्तो ऽन्योन्याश्रयात्, नाप्यन्यप्रयुक्तोऽनवस्थानात्, अभिन्नत्वेचौपाधिकभेदासिद्धान्तभङ्गात् उपाधिरेव ब्रह्मेति प्रतीत्यापत्तेश्च, नाप्यसत्यः परमतप्रवेशात् अनभ्युपगमाच्च, स्वाभाविकत्वपक्षे तेषां स्वरूपभिन्नत्वमभिन्नत्वं वा भिन्नाभिन्नत्वं वा, अत्यन्तभेदे शास्त्रविरोधः, "एवं गुणान् पृथक् पश्यन्" इत्यादिनिषेधश्रवणात्, नाऽप्यभिन्नत्वम् ब्रह्मणा तेषां सामानाधिकरण्यापत्त्या "आनन्दं ब्रह्मणोविद्वा" निति व्यधिकरणश्रुतिव्याकोपात् नापि चरमः स्वाभाविकभिन्नाभिन्नानामावरणासम्भवात्, अस्मन्मतप्रवेशाच्च, अन्यथास्वरूपस्याप्यावरणापत्तेः, स्वरूपावरणाभ्युपगमपक्षे सार्वज्ञादिहानेः, किञ्चोपाधेरपि सत्वनित्यत्वाभ्यामनिवृत्तिप्रसङ्गात्, तस्माद् दुरुपपादोऽयमौपाधिकभेदाभेदः, नापि कल्पितभेदवादः सम्भवति महादोषयोगात्, तथा हि ब्रह्मणि भेदकल्पनायां कोवाप्रयोजकः ब्रह्मवा उपाधिर्वा अन्यद्वा,नाद्यः शुद्धबुद्धनित्यमुक्तविशेषशून्ये वस्तुनि प्रयोजकत्वाभ्युपगमेनिर्विशेषत्वशुद्धत्वादिनाशात् मुक्तस्यापिभूयोऽज्ञानयोगापत्तेदुर्वारत्वात् किं च प्रयोजकस्य ब्रह्मणोनित्यत्वेन प्रयोज्यस्यापि नित्यत्वादनिवृत्त्यानिर्मोक्षप्रसङ्गात् द्वितीये आत्माश्रयापत्तेः द्वितीयाद्युपाध्यङ्गीकारे अन्योन्याश्रयादियोगात् नापि तृतीयः अन्यस्य जीवस्य तत्कार्यत्वेनोत्तरभावित्वात् तस्मात्प्रयोजकाभावात्कल्पनासिद्ध्याभेदस्य कल्पितत्वासम्भवात् अविद्यादेर्भिन्नं ब्रह्म देहादेर्भिन्नं चेतनमित्यादौ भेदस्य त्वयाऽपि सत्वाभ्युपगमात् अन्यथा अविद्यादिभ्यो ब्रह्मणो देहादिभ्यश्चेतनस्य चापरत्वासिद्धेरिति संक्षेपः, नापि केवलभेदाश्रयत्वं ब्रह्मण इति समीचीनं श्रुतिशतविरोधात् तद्व्याकोपात् "सर्वं तं परादा"दित्यादिभेदनिन्दाश्रवणाच्च, किञ्चाऽभेदोऽपि सदेव ब्रह्मणि, गुणगुणिनोर्देहदेहिनोश्चाभेदस्य त्वयापि याथात्म्याङ्गीकारात्, अलंविस्तरेण, नापि चिदचिद्विशिष्टं ब्रह्म वेदान्तविषय इति पक्षो रमणीयः चिदचितोर्विशेषणत्वासम्भवात्, तथाहि व्यावर्त्तकत्वं तावद्विशेषणत्वमिति सर्वतन्त्रसम्मतलक्षणं तस्य चानयोरनन्वयात् विशेषणत्वासिद्धेश्च व्यावृत्तव्यावर्त्यसिद्धिसापेक्षत्वाद्विशेषणस्य तथा च व्यावृत्तस्य ब्रह्मणश्चिदचितोव्यावर्त्तकत्वाभ्युपगम्यमानेऽपि कस्मा-

द्यावृत्तमिति व्यावर्त्यौर्विवेचनीयः चेतनाचेतनयोर्विशेषणत्वाभ्युपगमेन व्यावर्त्तकत्वात् पदार्थान्तरस्याभ्युपगमाच्च, किञ्च चेतनाचेतने सार्वज्ञादिविशिष्टस्य विशेषणे भवतः केवलस्य वा, नाद्यः विशिष्टवैशिष्ट्यापत्त्या विशिष्टसिद्धान्तभङ्गात् न द्वितीयः केवलत्वानभ्युपगमात्, अभ्युपगमे च सार्वज्ञादिविशिष्टंब्रह्म भिन्नं चेतनाचेतनविशिष्टं च भिन्नमिति विशिष्टद्वयसिद्धौ सत्यां विशिष्टाद्वैतभङ्गात्, चेतनाचेतनविशिष्टदेशस्य सार्वज्ञादिहीनापत्तेश्च निर्विशेषवादप्रवेशप्रसङ्गाच्च, अलंविस्तरेण, तस्मात्स्वाभाविकभेदाभेदाश्रयभूतमेव परब्रह्म श्रीपुरुषोत्तमो वेदान्तविषय इति सिद्धम, "एकः सन् बहुधा विचचार" "एको देवो बहुधा सन्निविष्टः" "त्वमेको सि बहुधा बहून्प्रविष्ट" इत्यादिश्रुतिभ्यः, ।

एकत्वे सति नानात्वं नानात्वे सति चैकता ।
अचिन्त्यं ब्रह्मणो रूपं कस्तद्भेदितुमर्हति ॥
केचिद्बहुत्वेन वदन्ति देव-
मेकात्मना केचिदिमं पुरातनम् ॥
वेदान्तसंस्थापितसत्त्वयुक्तम् ।
द्रष्टुं तमीशं वयमुद्यताः स्म ॥

इत्यादिस्मृतेः ।

"अंशोनानाव्यपदेशा""दन्यथा चापिदासकितवादित्वमधीयते" "एक उभयव्यपदेशात्त्वहिकुण्डलवदित्यदिसूत्राच्च । ननु भेदप्रयुक्तो ऽभेदस्तत्प्रयुक्तश्च भेद इति स्वाभाविकभेदाभेदपक्षस्याप्यन्योन्याश्रयदोषग्रस्तत्वात् अवच्छेदकाभावाच्च कथं निर्दोषत्वमिति चेन्न, न तावद्भेदाभेदनिरूपणे भेदाभेदयोः प्रयोज्य प्रयोजकत्वं येनोक्तदोषप्रसङ्गः, स्यात् अपि तु स्वतन्त्रपरतन्त्र सत्वनिर्णयोपयिकयोर्नियन्तृत्वनियम्यत्वयोः सत्त्वान्नोक्तदोषसंसर्गावकाशः, आत्मा हि परमस्वतन्त्रोधिगुणः, "सर्वस्य वशीसर्वस्येशानः" "एतस्य वाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" "भीषास्माद्वातः पवते भीषोदेति सूर्यः" "अज्ञोजन्तुरनीशश्च आत्मनः सुखदुःखयोः" "ईश्वरप्रेरितोगच्छेत्स्वर्गं वाश्वभ्रमेव वे"त्यादिश्रुतिभ्यः, नाप्यनुगतावच्छेदकाभावः, अखण्डोपाधिरूपानुगतावच्छेदकस्य सत्वा-

त्, ननु स्वाभाविकभेदाभेदवादेपि ब्रह्मणः स्वत एव जीवभावाभ्युपगमात् गुणवद्दोषाश्च स्वाभाविका भवेयुरिति निर्दोषब्रह्मतादात्म्योपदेशा विरुद्धा एवेति चेन्न, स्वरूपतो जीवेशयोरभेदानभ्युपगमात्, तथा हि ब्रह्मणश्चेतनाचेतनयोश्च स्वरूपेण ऽभेदाभावः इतरेतरात्यन्तविलक्षणत्वात् "अस्थूलमनणु" इत्यादिश्रुतेः, तत्र चेतनस्याणुत्वेन निर्देशार्हत्वम् अचेतनस्य स्थूलत्वेन ब्रह्मणश्च तयोर्विलक्षणत्वेनेतिविवेकः, एवमेव तस्य तयोश्चसर्वात्मत्वसर्वनियन्तृत्वसर्वव्यापकत्वस्वतन्त्रसत्वसर्वाधारत्वादियोगेन ब्रह्मात्मकत्वतन्नियम्यत्वतद्व्याप्यत्वतत्तन्त्रसत्वपराधेयत्वादियोगेन चाभेद इतिसिद्धान्तजाह्नव्यां श्रीदेवाचार्यपादैर्दत्तोत्तरत्वात्, विशेषश्च तत्रैव द्रष्टव्यः, ननु भेदाभेदयोरितरेतरविरुद्धत्वात्कथंसामानाधिकरण्यमिति चेन्न, श्रुतिगम्यत्वात् न तर्केण परास्तुं शक्यः, अन्यथा "ऽणोरणीयान्महतोमहीया" नित्यक्षद्दिपरस्परविरुद्धत्वाद्धेयमेव भवद्भिर्वैदिकैः, न च तेषां श्रुतिप्राप्तत्वाद्यवस्थयैव भाव्यमन्यथाश्रुतिवाध इति वाच्यम्, प्रकृतेपि तुल्यत्वात् इत्यलं विस्तरेण, विशेषस्तु श्रुत्यन्तकल्पवल्ल्यामुक्तः, एतेषां संशयानां नाशक इत्यर्थः, चकारो विपर्ययादिसमुच्चयार्थः । भिन्नाभिन्न स्वाभाविकाचिन्त्यानन्तकल्याणगुणाब्धौ ब्रह्मणि औपाधिकभेदाश्रयत्वकल्पितभेदाश्रयत्वकेवलभेदाश्रयत्वविशिष्टाद्वैतत्वादिपक्षेष्वेकतमस्य कल्पनं निर्गुणत्वमायाकल्पितगुणवत्त्वं वा विपर्ययज्ञानं श्रुतिविरुद्धत्वादनुपपन्नत्वाच्च, एवमन्यदप्यनुसन्धेयं, तथा भूतविपर्ययान् भिनत्तीति विपर्ययभेत्तेति चकारार्थः, ।

तत्रहेतुमाह—

सर्वागमविशारद इति ।

सर्वेष्वपि आगमेषु शास्त्रेषु विशारदो निपुणः नित्यमुक्तत्वेनापरिच्छिन्नज्ञानत्वात् "सदा पश्यन्ति सूरय" इतिश्रुतेः, पदवाक्यप्रमाणनिर्णयविषयककौशल्यासाधारणाश्रयः, अन्यथा संशयभेत्तृत्वासम्भवात्, हेतुहेतुमद्भावो वात्र विवक्षितः' सर्वसंशयभेत्तृत्वात्सर्वागमविशारदः, सर्वागमविशारदत्वाद्वा सर्वसंशयभेत्तेत्यर्थः "सगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियंब्रह्मनिष्ठ"मितिश्रुत्युक्तलक्षणं वाऽत्र विवक्षितं, तथा च श्रोत्रियपदस्य सर्वाग-

मविशारद इति व्याख्यानम्, ब्रह्मनिष्ठमिति पदस्य सर्वसंशयमेत्तेतिबोध्यम्, उभयविधानाच्छिन्नानुभूत्यसाधारणाश्रयत्वाद्वाचार्यपादानामिति संक्षेपः, ॥ ९ ॥

कालादिसम्बन्धाभावंदर्शयन् नित्यमुक्तत्वंदर्शयति—

कालकर्मगुणातीतइति ।

कालकर्मगुणातीतः सर्वदाचारतत्परः ॥
श्रीकृष्णस्यकृपापात्रं प्रेमसंपुटपुष्कलः ॥ १० ॥

कालः भूतभविष्यद्वर्त्तमानचिरक्षिप्रादिप्रत्ययासाधारणहेतुः प्राकृतद्रव्यादेः तत्सम्बद्धचेतनस्वभावादेर्ज्ञानसङ्कोचादेश्च परिणमनादिहेतुश्च, कर्माणि सञ्चितक्रियमाणप्रारब्धरूपाणि पुण्यापुण्यलक्षणानि, गुणाः सत्वरजस्तमांसि, उपलक्षणं चैतत् क्लेशतापविकारादीनां, तत्र क्लेशः पञ्चधा, "अविद्यास्मितारागद्वेषाभिनिवेशाः" "तापस्त्रिधा, अध्यात्मिकाधिदैविकाधिभौतिकभेदात्, विकारःषड्विधः, जन्मास्तित्ववृद्धिपरिणामापक्षयनाशभेदात्, तत्प्रयोजकप्रकृतिसम्बन्धश्च, एभ्योतिक्रान्तः, सर्वदेति अत्रान्वेतव्यः, एतेन नित्यमुक्तलक्षणमप्युक्तं भवति, त्रैकालिकसंसारदुःखविषयकसामान्यज्ञानानाश्रयत्वे सति सदैव स्वभावतो भगवदनुभावितततत्स्वरूपगुणादिविषयकानुभववत्त्वं तत्त्वम्, अस्य च तत्र समन्वयात् तथात्वमित्यनवद्यम्,

किञ्च सर्वदाचारतत्परइति ॥

सर्वस्मिन्नपि काले भगवच्छास्त्रोक्ताचारपरायणः यद्वा सर्वदश्चासावाचारतत्परश्चेतिविग्रहः, सर्वभ्यो भक्तेभ्यो वाञ्छितं ददातीति सर्वदः, यद्वा सर्वं पुरुषार्थं ददातीति तथोक्तः, यद्वा सर्वमनाचारतन्मूलदोषं सदाचारप्रतिबन्धकं द्यतिखण्डयतीति तथा, यद्वा सर्वानपि स्वाश्रितान् तद्बुद्धीश्च स्वानुग्रहेण दायति शोधयतीति तथोक्तः सर्वदः, आचारः शास्त्रोक्तभागवतधर्माचरणरूपः स एव परः प्रधानं यस्य स चासौ सचेत्यर्थः,

अत एव श्रीकृष्णस्य कृपापात्रम् इति ।

सर्वदेशकालादिषु तदनुकूलाचारपरत्वादेव तस्य प्रेष्ठः ।

किञ्च प्रेमसम्पुटपुष्कल इति ।

प्रेम्णो भगवदीयगुणादिविषयकस्य सम्पुटः स चासौ पुष्कलश्चेति विग्रहः सदैवाविर्भूतभगवद्विषयकानुभूतित्वात् ॥ १० ॥

निर्विकारत्वं दर्शयन्नाह

तारुण्यमित्यादिना ।

तारुण्यं वयसा प्राप्तो न विकारमनाः क्वचित् ।
एतत्सुमहिमा कोऽपि विरलो दृश्यते भुवि ॥११॥

वयसातारुण्यं प्राप्तोपि काले विकारमना न भवति भवानिति संबन्धः विकारहेतोः प्रकृतिसंबन्धादेरभावात् ब्रह्मवत् ।

तथाभूतस्यात्यन्तदौर्लभ्यं दर्शयन्नन्यानपि अवतारविशेषान् सूचयन्नाह ।

एतत्सुमहिमेति ।

एष सुष्ठु महिमा यस्य स तथा भूतो भवादृशो भुवि विरलो दृश्यते न बहव इति यावत्, "एष माहेमा ब्राह्मणस्य न कर्मणा वर्द्धतेनोकनीया"निति श्रुतेः ॥ ११ ॥

अथ स्वभक्तानां साधनाभावेऽपि पुरुषार्थसाधकत्वं श्रीभगवत आचार्यस्य व्यञ्जयन्स्तौति ।

किंदुरापादनं तेषां कृष्णमार्गानुवर्त्तिनामिति ।

किंदुरापादनं तेषां कृष्णमार्गानुवर्त्तिनाम् ।
असिद्धमपि सिद्धं स्यात्तत्कृपापाङ्गवीक्षणैः ॥१२॥

कृष्णस्य मार्गोऽत्रा ऽऽचार्योपदिष्टसम्प्रदायाश्रयणम्,

तदनुवर्त्तिनां दुरापादनं दुःसाध्यं किं न किमपि दुःसाध्यमित्यर्थः, कुत इत्यत्राह असिद्धमपि सिद्धं स्यादिति, अनेकैरप्युपायैरप्यकृतात्मभिः सत्सम्प्रदायशास्त्राचार्यपराङ्मुखैरसिद्धमप्राप्यमपि तेषां तत्साधनाभावेऽपि सिद्धं स्यादिति ।

यावैसाधनसम्पत्तिः पुरुषार्थचतुष्टये ।

तया विना तदाप्नोति नरोनारायणाश्रयः ।

इत्यादिस्मृतेः ।

ननु साधनं विना फलं सिद्धिः कथमसम्भवात् अन्यथा

सर्वेषामपि तदापत्तिर्दुर्वारा साधनाभावाविशेषादित्याशङ्कानिरासार्थमाह,

तत्कृपापाङ्गवीक्षणैरिति ।

तस्य कृपया सह अपाङ्गः कटाक्षस्तेन वीक्षणानि तत्कृपापाङ्गवीक्षणानि तैः तस्य कृपार्द्रकटाक्षावलोकनैरित्यर्थः, "यमेवैषवृणुते तेन लभ्य" इति श्रुतेः,

तत्प्रसादादवाप्नोषि शाश्वतं पदमव्ययम् ।

तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ।

इति श्रीमुखोक्तेः ॥ १२ ॥

अथ गुणान्तरमाह—

त्यक्तसर्वदुराचार इति ।

त्यक्तसर्वदुराचारः कृष्णचर्यापरिग्रहः ।
भावनाशुद्धसर्वत्रः पक्षपातविवर्जितः ॥१३ ॥

त्यक्तस्त्याजितः सर्वेषां स्वाश्रितानां दुराचारो येन सः सदाचारोपदेष्टृत्वात्, यद्वा लोकदृष्ट्यैवोक्तिः, सर्वोऽपि दुष्टो विपर्यय आचारो यस्य स सर्वदुराचारो बाह्यान्तःकरणवर्गो बुद्धीन्द्रियादिगणः "पराञ्चिखानिव्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यति नान्तरात्म" न्निति श्रुतेः, त्यक्तः सर्वदुराचारः पराङ्दृष्ट्यसाधारणहेतुः करणवर्गो येन सः संयमितबाह्यान्तःकरणइत्यर्थः, यद्वा सर्वैर्दुराचारैस्त्यक्त इति त्यक्तसर्वदुराचारः सुदर्शनावतारत्वेना ऽसह्यतेजस्त्वात् तत्सकाशात्सर्वेदुराचाराः स्वयमेव पलायिताः, यथा प्रदीप्ताग्नेरिववनंत्यस्कामृगादिशोदिशोधावन्ति तद्वदित्यर्थः,

किञ्च कृष्णचर्यापरिग्रह इति ।

कृष्णचर्या एव परिग्रहः परिकरो यस्य सः नैष्ठिकत्वात् संग्रहान्तरशून्य इत्यर्थः, यद्वा कृष्णाचर्यायै एव परिग्रहः संग्रहो यस्य न स्वार्थे परार्थे वेति, यद्वा कृष्णचर्यायै तत्प्रवृत्यर्थमेव परिग्रहोऽवतारो यस्यसः ।

किञ्च भावनाशुद्धसर्वत्र इति ।

भावनया जीवोद्दिधीर्षालक्षणया शुद्धो भावनाशुद्धःसर्वत्रः स-
चासौ सचेति विग्रहः, यद्वा भावनयास्वोद्दिष्टश्रीकृष्णध्यानसन्तत्या
कृत्वा शुद्धान् विगतरागादिदोषान्सर्वानपि स्वाश्रितांस्त्रातीति त-
थोक्तः, विसर्गाभावपाठेसम्बोधनं तद्भावेच विशेषणमिति द्विवि-
धोपिपाठः समञ्जसः समानार्थश्च बोध्यः ।

गुणान्तरमाह—

पक्षपातविवर्जित इति ।

असौशत्रुरसौमित्रमितिपक्षपातः पशुतुल्यानांदेहात्माभिमानिनां
यथा भवति तेनशून्यः रागादिविषयरहित इत्यर्थः, ननु तर्हि
कथमाचार्यत्वाधिकारनिर्वाहस्तस्यानुग्रहनिग्रहादिसाध्यत्वात् त-
द्योगे च वैषम्यादेरवश्यम्भावित्वात्कथं पक्षपातशून्यत्वमिति चे-
त्सत्यम् भगवदवतारवत् सर्वस्यापि सामञ्जस्यात् तद्धितार्थं तेषां
निग्रहो न वैषम्यावहः अन्यथाश्रीपुरुषोत्तमेऽपि तत्प्रसङ्गस्य दुर्वा-
रत्वादिति सङ्क्षेपः ॥ १३ ॥

अथ गुणविशेषान्दर्शयन्नाह—

सत्यवागिति ।

सत्यवाक् सत्यसङ्कल्पः कृतसिद्धान्तनिर्णयः ।
वृद्धसेवी वृद्धिकर्त्ता भर्त्ता सर्वस्य पालकः ॥ १४ ॥

सत्यावाचो यस्य सः यथार्थवक्तेतियावत् अनेन तस्याप्तत्वमुक्तं
भवति नित्यमुक्तत्वेन बुद्धिमान्द्यदुराग्रहादिभिराप्तत्वप्रतिभटैः स-
दैवास्पृष्टमाहात्म्यत्वात् ।

अत एव सत्यसङ्कल्प इति ।

अथ पूर्वोक्तसर्वशास्त्रविशारदत्वं व्यञ्जयन्नाह—

कृतसिद्धान्तनिर्णय इति ।

कृतोवेदानां सिद्धान्तनिर्णयो येन सः, यद्वा कृतीछेदने इत्यस्य-
धातोः प्रयोगः कृत्तः छिन्नः सिद्धान्तविरोधिनां निर्णयोयेनसः,

किञ्च वृद्धसेवीति ।

वृद्धाः ज्ञानादिवृद्धाः श्रीनारदादयस्तान् सेवनशीलः, यद्वा

वृद्धो गुणशक्त्यादिभिर्बृहत्तमो भगवान्वासुदेवः परब्रह्मशब्दाभिधेयः, "बृहन्तो गुणा अस्मि"न्निति श्रुतेः तं सेवनशीलः,

किञ्च बृद्धिकर्त्तेति।

स्वाश्रितानां बृद्धिं बृहद्ज्ञानप्रकाशरूपां करोतीति तथा

किञ्च भर्त्तेति।

ज्ञानभक्त्यादिना भक्तान् बिभर्त्तीति।

तत्रहेतुः सर्वस्यपालक इति।

"सर्वे श्रेयांसिपश्यन्तु" इत्यादिशास्त्रोक्तसर्वविषयकश्रेयःसङ्कल्पपूर्वकोपदेशप्रभावेन सर्वस्य जगतो भाविश्रेयस्कस्य पालक इति भावः॥ १४॥

किञ्च मन्दानां शाठ्यनिर्वृत्त्या सर्वसौभाग्यदायक इति—

मन्दानां शाठ्यनिर्वृत्त्यासर्वसौभाग्यदायकः।
आचारवैरिणो हन्ता कार्यसिद्धिप्रदायकः॥ १५॥

मन्दा अल्पबुद्धयस्तेषां शाठ्यं शठस्य भावो वञ्चकता तस्यनिर्वृत्त्यानिवारणेन सुष्ठुभगः पागुण्यं यस्य स सुभगः भगवान् श्रीकृष्णः

ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसः श्रियः।

ज्ञानवैराग्ययोश्चैव षण्णां भगइतीङ्गना।

इति श्रीपराशरोक्तेः।

सुभगस्य भगवतो भावः सौभाग्यं परं श्रेयः मोक्षः सर्वस्मै तस्यदायकः।

किञ्च आचारवैरिणोहन्तेति।

आचारः शास्त्रोक्तसदाचारः भागवतधर्मस्तस्य वैरिणो बाह्यास्तान्त्रिकावा राक्षसावा तान् हन्तीतितथासः।

किंच कार्यसिद्धिप्रदायक इति।

क्रियते इति कार्याणि अनुष्ठेयानि पुरुषार्थसाधनानि कर्मज्ञानादीनि तेषां सिद्धिस्तत्प्रतिवन्धकनिरासेन स्वरूपसंपत्तिस्तांप्रकर्षेणददातीति तथासः॥ १५॥

किं च आचारभ्रष्टजीवानां शनैर्युक्त्याप्रबोधयन्निति।

आचारभ्रष्टजीवानां शनैर्युक्त्या प्रबोधयन् ॥
भगवन्मार्गशुद्ध्या च कृतार्थीकृतभूतलः ॥ १६ ॥

आचारः संप्रदायशास्त्रोक्तधर्मानुष्ठानं तस्माद्भ्रष्टाश्च्युतास्तद्धीना इति यावत् ते च ते जीवाश्च तेषामनादिकालाद्धर्महीनानां शनैस्तत्तदधिकारानुसारेण तत्तद्बुद्ध्यनुसारेण च क्रमशः यथामन्दोपि जानीयात्तथा भूतया युक्त्या भगवत्प्राप्तिसाधनपरम्परोपदेशेनेत्यर्थः अकृतार्थम् कृतार्थं क्रियते इति कृतार्थीकृतं भूतलं येनसः ॥ १६ ॥

संप्रदायविमुखान् शोचन्नाह—

हतलोकोयमिति ।

हतलोकोऽयमज्ञः स्याद्वर्त्तमाने विभावसोः ॥
आचार्यरूपिणः सम्यक् जाड्यशीतेन दाह्यते ॥ १७ ॥

वर्त्तमानेसमये आचार्यरूपिणो विभावसोः शरणं विनाऽयं हतलोकः स्यादित्यध्याहृत्यान्वेतव्यं,"पृथक् विनानाने"ति सूत्रात्पञ्चमी, अयं जीवसंघातः हता नष्टा लोका यस्य सः यद्वा हतोलोकः प्रकाशोज्ञानं यस्य सः तथाभूतः सन्नज्ञः स्यात्, सम्भावनायां लिङ् ।

अज्ञत्वेहेतुमाह—

जाड्यशीतेन दाह्यते इति ।

जडस्य भावो जाड्यं तदेव शीतं तेन दाह्यते जडीकृत्य नाश्यते इत्यर्थः ।

तथा च मोक्षधर्मेजनकः ।

नविनागुरुसंबन्धं ज्ञानस्याधिगमः कृतः ॥
गुरुः पारयिता तस्य ज्ञानं प्लवमिहोच्यते इति ॥ १७ ॥

सर्वानप्युपदिश्य वात्सल्याद्यसाधारणगुणयोगात्तद्धितश्रुत्युक्तासाधारणश्रेयःसाधनमुपदिशन्नाह—

सत्यवाक्यं च शृणुतेति ।

सत्यवाक्यं च शृणुत त्यक्त्वा तर्कवितर्कताम् ॥
आचार्यशरणं यात कलौ निस्तारहेतवे ॥ १८ ॥

हे जना इति सम्बोधनमध्याहर्त्तव्यं, ह जनाः भवतां हितोप-

देष्टुरुद्दिधीर्षोर्मम सत्यं यथार्थमबोधितविषयकं वाक्यं शृणुत ।

किं तद्वाक्यम्, अस्माकं हितं चेतर्हि कथ्यतामित्यत्राह—

तर्कवितर्कतां त्यक्त्वा आचार्यशरणं यातेति ।

तव वाक्यर्थाङ्गीकारे श्रेयोऽस्माकं स्याद्वानवेत्यादि सङ्कल्पविकल्पादिकं संशयं विपर्ययादिरूपमयथार्थत्वं वा त्यक्त्वा, "संशयात्माविनश्यति" "नायंलोकोस्ति न परो न सुखं संशयात्मन" इत्यादिशास्त्रात्, "सगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" "आचार्यदेवोभवे"त्यादिश्रुतेः, "आचार्योपासनं शौच"मिति भगवदुक्तेश्च, ।

तत्प्रयोजनमाह—

कलौनिस्तारहेतव इति ।

संसारादिति शेषः, संसारभ्रमणदुःखनाशार्थमिति यावत् कलिशब्दप्रयोगादस्मिन्युगे आचार्याश्रयणस्य मुख्यत्वं द्योतितम् ॥१८॥

वात्सल्यादिगुणान् दर्शयन्नाह ।

भक्तानुग्रहकर्त्ताचेति ॥

भक्तानुग्रहकर्ता च सर्वसौख्यप्रदः शुभः ॥
बालबोधी कृपादृष्टिर्निर्वृत्तरहितः परः ॥ १९ ॥

भक्तेभ्यः आत्मानन्यभजनशीलेभ्योऽनुग्रहकर्त्ता, अनुग्रहोनामस्वात्मीयतयानुग्रहणमात्मसात्करणम् आत्मसात्कर्त्तेत्यर्थः—

अनुग्रहफलमाह ।

सर्वसौख्यप्रद इति ।

सर्वं सौख्यं मोक्षलक्षणं ददातीति तथा, यद्वा सर्वेभ्यः सौख्यं प्रददातीति तथा,

अतः शुभ इति, सर्वमङ्गलमूर्तित्वात् स्वयं कल्याणरूपः ।

किञ्च बालबोधीति, बाला अज्ञाः शास्त्रसंस्कारवर्जितास्तान् बोधनशीलः ।

किञ्च कृपादृष्टिरिति, सौम्यदृष्टिरित्यर्थः ।

किञ्च निर्वृत्तरहित इति, नितरांवर्त्तते इति निर्वृत्तः प्रकृतिसंबन्धस्तद्रहितः नित्यमुक्तत्वात्, अत एव परः पूर्णः श्रेष्ठो वा, ॥१९॥

किञ्च आकारोभक्तिमार्गस्येति ।

आकारो भक्तिमार्गस्य भेदरत्नसमन्वितः ॥
अनन्तभावभक्तिश्च लभ्यतेऽत्र समाहितः ॥ २० ॥

निगमनस्थानं भक्त्युत्पत्तिस्थानमित्यर्थः ॥

किञ्चभेदरत्नसमन्वित इति ।

भिद्यतेऽनेनेति भेदः साक्षात्काररूपानुभवः संशयविपर्ययकोशहृदयग्रन्थिभेदकत्वात् ।

भिद्यतेहृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्यकर्माणि तस्मिन्दृष्टेपरावरे ॥
इति श्रुतेः ।

स एव रत्नरूपस्तेन समन्वितो भूषित इति ॥

किञ्च अनन्तभावभक्तिश्चलभ्यतेऽत्रेति ।

अत्र भगवति श्रीमदाचार्ये भगवद्रूपे अनन्तभावभक्तिर्लभ्यते अनन्तोऽपरिच्छिन्नो भावः स्वभावो यस्याः सा अनवच्छिन्नस्वभावा भक्तिरित्यर्थः यद्वा त्वत्तः सकाशात् अत्र भगवति रमानिवासे श्रीकृष्णे विषयेऽनन्तभावभक्तिस्त्वद्दीयमाना त्वदनन्यभक्तैर्लभ्यते प्राप्यत इति योजना ।

तत्र हेतुमाह—

समाहित इति ।

भवान्सर्वेष्वपि कालेषु स्वाश्रितानां परभक्तिदाने समाहितः सावधानः एतदर्थकावतारत्वाद्भवत इत्यर्थः ॥ २० ॥

किञ्च स्वार्थहीन इति ।

स्वार्थहीनः परार्थी च महोदारदयानिधिः ॥
यौवनैश्वर्यसामग्री येन विष्णौ निवेदिता ॥ २१ ॥

स्वस्मै अर्थ्यन्ते इष्यन्ते इति स्वार्थाः शब्दादयो विषयास्तैर्हीनस्तत्संकल्पशून्यः स्वभावतोऽस्पृष्टवासनासंस्कारत्वात् ।

अत एव परार्थी चेति ।

परेभ्योऽर्थः परार्थः संसारदुःखनिवारणरूपः स विद्यतेऽस्येति

परार्थी संसारचक्रभ्रमणदुःखपीडितजनतोद्धरणार्थवान् जगदुद्धिधीर्पुरित्यर्थः, यद्वा परस्मैभगवतेऽर्थः परार्थः तदाज्ञाप्रवर्त्तनरूपोऽस्य विद्यते स परार्थी भगवदाज्ञारूपभागवतधर्मोपदेष्टेत्यर्थः, परार्थित्वादेव महोदारदयानिधिः, अतिमन्देभ्योऽपि स्वप्रपन्नेभ्यो भगवत्स्वरूपादिविषयकज्ञानदानशीलत्वान्महोदारः "योवाएतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति सकृपण"इतिश्रुत्युक्तकार्पण्यहर्त्तृत्वात् ।

कार्पण्यहरणोत्सुक इति वक्ष्यते च ।

कथमेवंविधस्वभावः, यतोदयानिधिः, निर्हेतुकपरदुःखदुःखित्वे सति तन्निराचिकीर्षा दया, तस्या निधिः दयासमुद्र इत्यर्थः महोदारश्चासौ दयानिधिश्चेति तथासः, दयागुणवश्यत्वात्प्रपत्तिमात्रेणापि तत्तदभीष्टं ददातीति भावः. ननु सर्वोऽपि जनः स्वप्रपन्नाय यथाशक्ति ज्ञानादि ददात्येव दयानिधेः कथं प्रपत्तेरपेक्षा तथात्वे वैषम्यापत्तेर्दुर्वारत्वादिति चेन्न, अप्रार्थितोनगोपाये"दित्यादिशास्त्रात्प्रपत्तिरपेक्षितैव अन्यथा सर्वमोक्षप्रसङ्गात् वैषम्यस्य तु पक्षपातविवर्जित इत्यस्मिन्पदेव्याख्यायामेवपरिहृतत्वादलंविस्तरेण, ।

इदानीं—

या वै साधनसंपत्तिः पुरुषार्थचतुष्टये ॥
तया विना तदाप्नोति नरो नारायणाश्रयः ।

इत्यादिशास्त्रात्, साधनेषु प्रपत्तेरेव प्राधान्यं दर्शयन् तदेव संप्रदायनिष्ठान् शिक्षयंश्च आचार्यकृतां तामेव प्रपत्तिं दर्शयति ।

यौवनैश्वर्यसामग्री येन विष्णौ निवेदितेति ।

येनभगवताऽऽचार्येण यौवनैश्वर्यसामग्री विष्णौ सर्वेश्वरे श्रीकृष्णे निवेदिता सोऽस्मदादीनामुद्धर्ते त्यध्याहृत्य योजनीयं, "ममोद्धर्त्ताभवार्णवा"दितिवक्ष्यति, यौवनं चैश्वर्यं चानयोः समाहारः यौवनैश्वर्यं, तच्च भुक्तिमुक्त्योरुपायत्वात्सामग्रीत्युक्तम् , तत्र यौवनं यूनो भावः कर्म वा विग्रहबलचेष्टादिकम्, ऐश्वर्यम् निग्रहादिसामर्थ्यं—

निग्रहानुग्रहाभ्यां वै श्रीकृष्णेन समानता ।

इत्यनन्तरमेव वक्ष्यते ।

तत्सर्वं भगवति निवेदितम् ।

त्वां विना नान्यमुद्दिश्य करिष्ये किञ्चिदप्यहम्, ॥

इत्यादिशास्त्रात्, तदनुवृत्यर्थकावतारत्वात् तस्योपलक्षणं चैतदात्मनोऽपि, तथा च आत्मात्मीयं सर्वं भगवदर्थमेव, आत्मात्मीयभरन्यासो भगवति कृत इत्यर्थः ॥ २१ ॥

अथ श्रीमदाचार्यं भगवद्भावं ख्यापयन्नाह—

आचार्यो विष्णुरूपो हि पुराणेष्विति निर्णय इति ।

आचार्यो विष्णुरूपो हि पुराणेष्विति निर्णयः ॥
निग्रहानुग्रहाभ्यां वै श्रीकृष्णेन समानता ॥ २२ ॥

आचार्यः साक्षाद्विष्णुरूप एव तथात्वे च सर्वैः सदोपास्य इत्यर्थः ।

तत्र प्रमाणमाह—

पुराणेष्विति ।

तथापाद्मे—

देवद्युतिस्तुतौ ।

भक्तिर्यथा हरौ मे ऽस्ति तद्वदिष्टा गुरौ यदि ॥
समास्थितेन सत्येन स्वं दर्शयतु मे हरिरिति ।

विष्णुधर्मे च ।

देवतायां च मन्त्रे च तथा मन्त्रप्रदे गुरौ ।
भक्तिरष्टविधा यस्य तस्य विष्णुः प्रसीदति ।

यद्वा पुरातनत्वात् पुराणशब्दो वेदवाचक इत्युक्तार्थः, वेदेषु निर्णयोनामनिर्णीतोर्थः,

गुरुरेव परं ब्रह्म गुरुरेव परा गतिः ।
"आचार्यदेवोभवे"त्यादिश्रुतेः,
यस्माद्देवो जगन्नाथः कृत्वा मर्त्यमयीं तनुम् ।
मग्नानुद्धरते लोकान् कारुण्याच्छास्त्रपाणिना ॥
तस्माद्भक्तिर्गुरौ कार्या संसारभयभीरुणेति—
जगदाख्यानसंहितायाम् ॥
पञ्चरात्रे ।
वैष्णवज्ञानवक्तारं यो विद्याद्विष्णुवद्गुरुम् ॥

पूजयेद्वाङ्मनःकायैः स शास्त्रज्ञः स पण्डितः ।
श्लोकपादस्य वक्तापि यतः पूज्यः सदैव हि ।
किंपुनर्भगवद्विष्णोः स्वरूपं वितनोति यः ॥
यावदायुस्त्रयः पूज्याः सिद्धान्तो गुरुरीश्वरः ।
पूर्वं ज्ञानाय पश्चात्तु कृतघ्नत्वापनुत्तये ॥
इति ।
तत्रैवान्यत्रव्यतिरेके ॥
येषां गुरौ च जप्ये च विष्णौ च परमात्मनि ।
नास्ति भक्तिः सदा तेषां वचनं परिवर्जयेदिति ॥
एवमन्यान्यपि वाक्यान्यनुसन्धेयानि, ।
ऐश्वर्यासाधारणगुणौ दर्शयन्नाह—
निग्रहानुग्रहाभ्यां वै श्रीकृष्णेन समानतेति ।

यथा श्रीकृष्णः कंसमिथ्यावासुदेवादीनां निग्रहाधिकारिणां निगृहीतवान् पाण्डवोद्धवादीनामनुग्रहाधिकारिणां चानुगृहीतवान् तथैवायमपि भगवत्पराङ्मुखानां शास्त्रबाह्यानां निग्रहं कृत्वा स्वपादभाजां सदाचारवतां ह्यनुग्रहं करोतीति तत्साम्ये दृष्टान्तः, ।

"यस्य देवे पराभक्ति"रित्यादिना ऽतिदेशवाक्येन तत्साम्यभक्तिः करणीयतया निरूपिता, विशेषशङ्कातु यथाश्रीभगवदुपासनस्य स्वातन्त्र्येण कर्त्तव्यता श्रुतिशतैर्विधीयते, न तथा ऽऽचार्योपासनेस्येति, न च "समुद्रमेवाभिगच्छे"दित्यादेः सत्वान्नोक्तदोषयोग इति वाच्यम्, तस्य विधिवाक्यस्य पराङ्गत्वेन स्वन्तत्रविधित्वाभावादिति समाधानं तूक्तवाक्यस्य पराङ्गविधानपरत्वेपि गुरोः परमेश्वरत्वश्रवणात्तदैक्यवाक्यतार्थं स्वातन्त्र्यमप्यविरुद्धम्, ।

तथोक्तंश्रीनारदपञ्चरात्रे ।
गुरुरेव परं ब्रह्म गुरुरेव परं धानम् ।
गुरुरेव परः कामो गुरुरेवपरायणम् ॥
गुरुरेव परा विद्या गुरुरेव परा गतिः ।
अर्चनीयश्च वन्द्यश्च कीर्त्तनीयश्च सर्वदा ।
ध्यायेज्जपेन्नमेद्भक्त्या भजेदभ्यर्थयेन्मुदा ।
उपायोपेयभावेन तमेव शरणं व्रजेत् ।

शरीरं चासुविज्ञानं वासः कर्मगुणान्वसून् ।
गुर्वर्थं धारयेद्यस्तु स शिष्यो नेतरः स्मृत इति ।
अन्यत्रापि ।
गुरुपादाम्बुजं ध्यायेद् गुरोर्नाम सदा जपेत् ।
श्रीगुरोर्वार्त्ताकथां चैव गुरोरन्यन्न भावयेत् ।
इत्यादिना च गुरूपासनस्य स्वातन्त्र्यविधानादिति संक्षेपः॥२२॥
पूर्वश्लोकेन गुरोः श्रीभगवतासाम्यं निरूपितम्–
शास्त्रमुखेनेदानीं ततोप्याधिक्यमाविष्कुर्वन् श्रीगुरुस्तौति ।
हरौरुष्टइति ।

हरौ रुष्टेगुरुस्त्राता गुरौ रुष्टे न कश्चन ॥
तस्मात्सर्वप्रयत्नेन प्रसाद्यः सर्वदेहिनाम् ॥ २३ ॥

यद्यपि हरेरप्यसाधारणवात्सल्यादियोगादिना रोषो न भवति तथापि महदपराधादिना तज्ज्ञापनार्थं रोषादिसम्भावना क्रियते जीवादृष्टोपाधिनेतिबोध्यं सचगुरुप्रार्थनया निवर्त्तत इत्याह ।
गुरुस्त्रातेति ।
श्रीगुरौ रुष्टे तु न कोपि त्राणहेतुरित्याह—
गुरौरुष्टेनकश्चनेति ।
बहिर्यामिणि भगवति गुरुरूपे रुष्टे सति साक्षाद्भगवानपि त्राता न भवति कुतोऽन्य इत्यर्थः ।
नारायणोऽपयाति गुरोः प्रच्युतस्य दुर्बुद्धेः ।
कमलं जलादपेतं शोषयति रविर्नतोपयति ॥
इति जयदाख्यानसंहितावचनात् ।
ततः किं कार्यमित्यत आह—
तस्मात्सर्वप्रयत्नेन प्रसाद्यः सर्वदेहिनामिति ।
तस्मादन्यगत्यभावात्सर्वदेहिनामिति सर्वैर्देहिभिरित्यर्थः, सर्व प्रयत्नेन येन केन प्रकारेण गुरुरेव प्रसाद्यः प्रसादनीय इत्यर्थः तत एव श्रेय इति भावः ।
हरौ रुष्टेगुरुस्त्राता गुरौ रुष्टे न कश्चन ।
तस्मात्सर्वप्रयत्नेन गुरुमेव प्रसादयेत् ॥

इति पुराणोक्तार्थसङ्ग्रहरूपोऽयं श्लोकः ॥ २३ ॥

तस्माच्छ्रीगुरुर्मर्त्यबुद्ध्या कदापि नाऽवमाननीय इत्यात्मोद्देशेन विश्वं शिक्षयन्नाह—

आचार्ये मानुषी बुद्धिर्न कर्त्तव्या कदाचनेति ।

आचार्ये मानुषी बुद्धिर्नकर्त्तव्या कदाचन ॥
अस्माभिः श्रेय इच्छद्भिर्यतः स्थानं हि श्रेयसाम्॥२४॥

अस्माभिः आचार्ये श्रीभगवन्मनुजावतारे मानुषीबुद्धिः अस्मदादिवदसावपि मनुष्य एवेति साम्यबुद्धिरध्यवसायः न कर्त्तव्य इति निषेधवाक्यसङ्ग्रहार्थः ।

यो विष्णोः प्रतिमाकारे लोहबुद्धिं करोति वा ।
यो गुरौ मानुषं भावमुभौ नरकपातिनौ ॥
इत्यादिनिषेधशास्त्रात् ।
तत्राधिकारिस्वरूपं दर्शयति ॥
श्रेय इच्छद्भिरिति ।

श्रेयोविमुखानां कामचारिणां व्यावृत्त्यर्थमिदं विशेषणं तत्र हेतुमाह—

यतः स्थानं हि श्रेयसामिति ।

यतः श्रीगुरोः प्रसादाच्छ्रेयसां सर्वमङ्गलानां स्थानं वैष्णवपदं वैकुण्ठाख्यं परमात्मविषयकानुग्रहो वा लभ्यत इति शेषः, यद्वा यतो यस्माद्धेतोः श्रीगुरोः तदुपासनं वा श्रेयसां स्थानं तस्मान्मानुषीबुद्धिस्तत्र कदापि न कर्त्तव्येति योजना "साहिविद्यां जनयति तच्छ्रेष्ठं जन्म तस्मै दुह्येन्न कर्हिचि"दितिश्रुतिः, ।

एकाक्षरप्रदातारमाचार्यं योऽवमन्यते ॥
श्वानयोनिशतं प्राप्य चाण्डालेष्वभिजायते ।
इत्यादिस्मृतेश्च" ॥ २४ ॥

इदानीं श्रीमदाचार्याणामनन्तगुणत्वात्तदनुग्रहस्य देशकालादिनिरपेक्षत्वं सर्वसिद्धिहेतुत्वं च निरूपयन्स्तौति ।

यस्मिन्नहनियर्ह्येवेति ।

यस्मिन्नहनि यर्ह्येव करोति कृपयाऽऽत्मसात् ॥
तर्ह्येव सर्वसिद्धिः स्यान्न काङ्क्षा तिथिवारयोः ॥ २५ ॥

यस्मिन्निति ।

सामान्यपदप्रयोगः उत्तमदिवसादिव्यावृत्त्यर्थः, कस्मिंश्चिदपि दिवसे इत्यर्थः,

यर्ह्येवेति,

यस्मिन्नपि मुहूर्त्तादौ नक्षत्रतिथ्यादौ न तत्र नक्षत्रतिथ्यादिविचारापेक्षेति अन्ययोगव्यवच्छेदरूपावधारणार्थः, यस्मिन्कस्मिंश्चिदपि दिवसे नक्षत्रमुहूर्त्तादौ वा करोति कृपयाऽऽत्मसात्जीवमित्यध्याहरणीयं कृपयात्मसात्करोति तर्ह्येव सर्वसिद्धिः स्यात् तस्मिन्नेव क्षणे सर्वसिद्धिः स्यादितिवाक्यार्थः, एवकारो ऽन्ययोगव्यवच्छेदार्थक इति स्वयमेव व्यवच्छेद्यं दर्शयति, नकाङ्क्षातिथिवारयोरितिस्पष्टार्थः, नक्षत्रादीनामप्युपलक्षणं बोध्यं, ननु यदि सिद्धिहेतूनां पुष्यादिनक्षत्राणां सिद्धादियोगानां तथैवोत्तमवारतिथ्यादीनामभावस्तर्हि कार्यसिद्धिरपि दुर्निरूप्या कारणाभावे कार्याभावस्य नियतत्वादित्याशङ्क्यात्यन्तायोगव्यवच्छेदार्थकेन तत्र प्राप्तेनैवकारेण परिहरति स्यादेवेति नस्यादिति न अपितुस्यादेवेत्यर्थः,

ननु कारणाभावे कथंसिद्धिरितिचेत्तत्राह–

कृपयेति ।

भवतः श्रीमत आचार्यस्य कृपाकामधेनुरूपायाः प्रधानबीजभूतायाः सत्वान्न कारणाभावशङ्कावकाशइत्यर्थः,

यावै साधनसंपत्तिः पुरुषार्थचतुष्टये ।
तया विना तदाप्नोति नरो नारायणाश्रयः ॥

इतिस्मृतेः ।

"यमेवैष वृणुते तेन लभ्य"इतिश्रुतेः ॥ २५ ॥

अथसंस्कारदातृत्वेन स्तुवन्नाह ।

पञ्चसंस्कारदायीचेति ।

पञ्चसंस्कारदात्री च ममोद्धर्त्री भवार्णवात्
तेषां प्रत्युपकारार्हो न कोपि जगतीतले ॥ २६ ॥

संस्कारो नाम कार्यान्तरयोग्यतापादनं, यथा ब्राह्मणाद् ब्राह्मण्यां जातोपि उपनयनं विनाऽध्ययनयोग्यता नास्ति, तेन चाध्ययनयोग्यतापादनं तथैव तापादिसंस्कारेण भगवत्परिचर्यादियोग्यतापादनं वैष्णवत्वं संस्कारः,

स च पञ्चविधः ।

तापः पुण्ड्रं तथा नाम मन्त्रो यागश्च पञ्चमः ॥
अमी हि पञ्च संस्काराः परमैकान्तहेतवः ।
इतिनारदपञ्चरात्रोक्तेः ॥

तत्र तापो नाम श्रीविष्णोरायुधशङ्खचक्रादिधारणम् ।

तथासामवेदे ।

"पवित्रमग्निः अग्निर्वै सहस्रारः सहस्रारो नेमिः नेमिना तप्ततनुर्ब्राह्मणः सायुज्यसालोक्यमाप्नोतीति" "सहोवाच याज्ञवल्क्यः तस्मात्पुमानात्महिताय प्रेम्णा हरिं भजेद्यत्सुदृलोकमौलेर्धर्माप्यग्निना संधत्ते तस्माद्धामैव ब्रह्मविदाप्नोतिपरमिति" „पवित्रं ते विततं ब्राह्मणस्य ते प्रभुर्गात्राणि पर्येपि विश्वतः अतप्ततनु र्नतद्धामाऽश्नुते शृतास इद्वहन्तस्तत् समास" इति "एभिर्वयमुरुक्रमस्य चिह्नैरङ्किता लोके सुभगा भवेम तद्विष्णोः परमं पदं येऽभिगच्छन्ति लाञ्छिता"इत्यादि श्रुतिभ्यः ।

तद्धारणनियमस्थानानि चत्वारि ज्ञेयानि ॥
नैमिषे मथुरायां च द्वारवत्यां तथैव च ।
सुदर्शनाश्रमे चैव संस्कुर्याद्दैशिकः सदा ॥
तप्तैश्चक्रादिभिर्विष्णोः शिष्यस्वाराज्यलब्धये ।
एषु स्थलेषु चक्रादेराविर्भावः सदा हरेः ॥
इत्यभियुक्तोक्तेः ।
विशेषस्तु गुरुनतिवैजयन्त्यामुक्तः ॥
अन्यत्र स्थलेषु कञ्चित्कालं शीतलमुद्रामेव धारयेदितिभावः ॥
विस्तृतश्च पूर्वाचार्यैस्तत्प्रकारविशेषः श्रीसदाचारप्रकाशे ॥ १ ॥

अथपुण्ड्रम् ।

धृतोर्द्ध्वपुण्ड्रः परमेशितारं—
नारायणं सांख्ययोगाभिगम्यम् ।
ज्ञात्वा विमुच्यते नरः समस्तैः ॥
संसारपाशैरिह चैव विष्णुम् ।
इति महोपनिषदि ।
धृतोर्द्ध्वपुण्ड्रः श्रितचक्रधारी ।
स्वरेण मन्त्रेण सदा हृदि स्थितम् ॥
परात्परं यो महतो महान्तम् ॥
इति कमठशाखायाम् ।
तिलकस्वरूपं च यजुर्वेदे हिरण्यकेशिशाखायाम् ॥
"हरेः पादाकृतिमात्मनो हिताय मध्ये छिद्रमूर्द्ध्वपुण्ड्रंयो धारयति स पुण्यभाग्भवति स मुक्तिभाग्भवती"त्यादिश्रुतिभ्यः ।

तिलकद्रव्यं च प्रधानं गोपीचन्दनमेव श्रौतत्वात् ।

"सहोवाच भगवान्वासुदेवो वैकुण्ठस्थानोद्भवं मम प्रीतिकरं मद्भक्तैर्ब्रह्मादिभिर्धारितं विष्णुचन्दनं ममाङ्गे प्रतिदिनमालिप्तं गोपीभिः प्रक्षालनाद् गोपीचन्दनमाख्यातं मदङ्गलेपनं पुण्यं चक्रतीर्थादिसंस्थितं शङ्खचक्रसमायुक्तं पीतवर्णं मुक्तिसाधनं भवति ।

इत्यादिश्रुतिभ्यः ।

तदभावे गङ्गातीर्थाद्युद्भवं तुलसीमूलस्थितं वा द्रव्यमपि ग्राह्यमेवेतिसंक्षेपः ॥ २ ॥

नामेति ।

वैष्णवी समाख्येति यावत्, "अङ्कयेच्छङ्खचक्राभ्यां नाम कुर्याच्च वैष्णवम्" इत्यादिश्रुतेः, तच्च श्रीहरिगुरुतत्क्षेत्रादिसम्बन्धवदेव धार्यं नान्यत्तत्सम्बन्धशून्यं तदन्यसम्बन्धवद्धेतिविवेकः ॥ ३ ॥

मन्त्रस्तुवैष्णवः स्वसम्प्रदायपरंपराप्राप्त एव ग्राह्यो देयश्च, "अमुं पञ्चपदं मनुमावर्त्तयेद्यः स यात्यनायासतः केवलं तत्पदंतत्" इति श्रुतेः, यश्च श्रीरामकृष्णादिमन्त्रा न मुक्तिहेतवस्तदुपासकानां फलविशेषमात्रदायका अपितु नारायणादिमन्त्र एव मोक्षहेतुरिति केषांचित्स्ववुद्ध्युत्प्रेक्षित उद्घोषः स तुच्छ एवानुपपन्नत्वात्, तथाहि श्रीकृष्णादिमन्त्राणां मोक्षहेतुत्वं प्रमाणाभावाद्वा बाधकसत्त्वाद्वेति विवेचनीयं, नाद्यः "अमुं पञ्चपदं मनु"

मित्यादिश्रुतीनां विद्यमानत्वात्, नापिद्वितीयः अप्रसिद्धत्वात्, यदि स्वानुभव एव प्रमाणं तर्हि तद्विपरीतस्यापि वक्तुं शक्यत्वात्, किञ्च श्रीकृष्णमन्त्रस्य मुक्तिसाधकत्वं भवतामनिष्टं तर्हि तच्चरमोपदेशश्लोकस्यापि तद्विषयकत्वेन तुल्ययोगक्षेमात्तस्यानुष्ठानमपि व्यर्थमेव, किमर्थं नित्यजाप्यतया तस्य स्थापनं मन्त्ररहस्येषु संग्रहश्च, किञ्च श्रीनारायणात् श्रीकृष्णादिलीलावतारणां भिन्नत्वमभिन्नत्वं वा भवतामभिप्रेतं, भेदपक्षेऽपि स्वरूपभेदो गुणशक्त्यादितारतम्यं वा, नाद्यः परमेश्वरस्यानेकत्वापत्तेः, ब्रह्मैक्यप्रतिपादकं सर्वमपि वेदान्तशास्त्रं दत्ततिलाञ्जलि स्यात्, गुणशक्त्यादितारतम्याङ्गीकारेऽपि—

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ।
अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते ॥
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।

इत्यादिश्रीमुखोक्तयः—

परं ब्रह्म परं धाम पवित्रं परमं भवान् ।

इत्यारभ्य—

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ॥

इत्यन्तं श्रीपार्थोक्तयः अथ निरवधिकातिशयकल्याणैकतानानन्तज्ञानानन्दैकस्वरूपः स्वाभाविकानवधिकातिशयज्ञानशक्तिबलैश्वर्यवीर्यतेजःप्रभृत्यसंख्येयकल्याणगुणमहोदधिरित्यारभ्य परब्रह्मभूतः पुरुषोत्तमो नारायणो ब्रह्मादिस्थावरान्तनिखिलजगत्स्रष्टा स्वरूपेणावस्थितो ब्रह्मादिदेवमनुष्याणां ध्यानार्चनाद्यगोचरोऽपारकारुण्यसौशील्यौदार्यमहोदधिः स्वमेव रूपं तत्सजातीयसंस्थानं स्वस्वभावमजहदेव तेषु लोकेष्ववतीर्य तैस्तैराराधितस्तत्तदिष्टानुरूपं धर्मार्थकाममोक्षफलं प्रापयन् भूभारावतारणापदेशेनास्मदादिनामपि संसारदुःखशमनाय सकलमनुष्यनयनविषयतां गत इत्यादिभाष्यारम्भः "मत्तः परतरं नान्य"दित्यस्यापि यथा सर्वस्यापि प्रकृतित्रयस्य कारणत्वेन सर्वाचेतनवस्तुशेषिणश्चेतनस्यापि शेषित्वेन कारणतया शेषितया चाहमेव परतरस्तथा ज्ञानशक्तिबलादिगुणयोगेन चाहमेव परः मत्तो व्यति-

रिक्तं सच्चित्ज्ञानबलादिगुणयोगि परतरं नास्तीति भवतामाचार्यभाष्यम् परं ब्रह्म परं धाम इत्यस्य श्लोकस्य भाष्ये उदाहृतानि श्रौतवाक्यानि "यतोवाइमानि भूतानि जायन्ते"इत्यारभ्य "परंज्योतीरूपं सम्पद्ये"त्यन्तानि—

"आहुस्त्वामृषयः सर्वे" इत्यस्य भाष्ये चोक्तानि—

एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः ॥
नागपर्यङ्कमुत्सृज्येहागतो मथुरां पुरीम् ।
पुण्या द्वारवती तत्र यत्रास्ते मधुसूदनः ॥
साक्षाद्देवः पुराणोऽसौ स हि धर्मः सनातनः ।
ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः ॥
ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम् ।
पवित्राणां हि गोविन्दः पवित्रं परमुच्यते ॥
पुण्यानामपि पुण्यो ऽसौ मङ्गलानां च मङ्गलम् ।
त्रैलोक्यं पुण्डरीकाक्षो देवदेवः सनातनः ॥
आस्ते हरिरचिन्त्यात्मा तत्रैव मधुसूदनः ।
यत्र नारायणो देवः परमात्मा सनातनः ॥
तत्र कृत्स्नं जगत्पार्थ तीर्थान्यायतनानि च ।
तत्पुण्यं तत्परं ब्रह्म तत्तीर्थं तत्तपोवनम् ॥
तत्र देवर्षयः सिद्धाः सर्वे चैव तपोधनाः ।
आदिदेवो महायोगी यत्रास्ते मधुसूदनः ॥
पुण्यानामपि तत्पुण्यं माभूत्ते संशयोऽत्र वै ।
कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः ॥
कृष्णस्य हि कृते भूतमिदं विश्वं चराचरम् ।

इत्यादीन्यार्षवाक्यानि दत्ततिलाञ्जलिकानि स्युः, किञ्च गुणशक्त्यादितारतम्याङ्गीकारेऽनीश्वरत्वप्रसङ्गः स्यात् लीलावतारोऽनीश्वरः ऐश्वर्यतारतम्ययोगात् ब्रह्मरुद्रादिवदित्यनुमानात्,

"न त त्समश्चाभ्यधिकश्च दृश्यते ।
नत्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः ॥
इत्यादिश्रुतिस्मृतिव्याकोपाच्च ।

अपिच युष्मत्संप्रदायप्रवर्त्तकस्य भाष्यकारस्य भाष्यानङ्गी-

करणे भवतामेवाचार्यविमुखत्वापत्तिर्दुर्वारेति द्वितीये भवतांप्रतिज्ञाभङ्गात् अस्माकमिष्टापत्तेश्च ।

तस्मात्सर्वेषामपि वैष्णवमन्त्राणां मोक्षहेतुत्वमेव, सकामाधिकारिणां च कामपूर्त्तये ह्युपासनात्तेषां मोक्षाभावो निर्विवादः, नारायणमन्त्रेपि तस्य तुल्यत्वादित्यलंविस्तरेण ॥ ४ ॥

यागश्चेति—

यागो नाम श्रीविष्णोरर्चावतारः श्रीशालग्रामादिः "यज्ञोवै विष्णु"रिति श्रुतेः, तदर्चननियमः पञ्चमसंस्कार इति सङ्क्षेपः, पञ्चमशब्दः अधिकसंख्याव्यावृत्त्यर्थः, एषां संस्काराणां इति यावत् चकारात् तदनुष्ठानप्रकारोपदेष्टापि बोध्यम् ।

अथ स्वस्मिन् श्रीगुरुकृतोपकारान् स्मरन्नाह—

ममोद्धर्ताभवार्णवादिति ।

यद्यपि नित्यमुक्तत्वात् प्रत्युत संसारिजनतोद्धिर्षयावतीर्णत्वाच्च न तत्र क्लेशादिसंसारिकधर्मयोगसंभावनाद्यवकाशशङ्कापि, तथापि लोकसंग्रहार्थं तथोक्तिर्न विरोधावहा, यथा श्रीनारदस्य भगवदवतारत्वेपि अज्ञजनान् गुरूपसत्तिप्रकारं संजिग्राहयिषया श्रीसनत्कुमारस्याग्रे स्वशोकादिसंसारधर्माणामाविष्कारः "सोहंभगवः शोचामी"त्यादिश्रुतिमुखोक्त्या, यथावा श्रीपुरुषोत्तमस्यावतारचरिते लोकवल्लीलानुकरणत्वान्निर्दोषादिविरोधस्तद्वदत्राप्यनुसन्धेयम्, एवमेव पूर्वोत्तर उक्तवक्ष्यमाणवाक्येष्वपि विवेको ज्ञेयः,अन्यथा "शङ्खावतारः पुरुषोत्तमस्येत्यादिविश्वाचार्यवाक्यविरोधो दुर्वार इति संक्षेपः ।

एवं चेत् तर्हि त्वया तत्प्रत्युपकारार्थमवश्यं प्रयतितव्यमित्याशङ्क्याह—

तेषां प्रत्युपकारार्हो न कोपि जगतीतल इति ।

तेषां श्रीमदाचार्यकृतोपकाराणां प्रत्युपकर्त्तुं योग्यः प्रत्युपकारसमर्थ इति यावत् न कोपीति, जगतीतले भूतले न जातो न जनिष्यति न वर्त्तते मनुष्यमात्र इत्यर्थः, जगतीत्युपलक्षणार्थं स्वर्गादीनां तत्रत्यैर्देवैरप्यशक्यमित्यर्थः ।

ब्रह्मविद्याप्रदानस्य देवैरपि न शक्यते ।
प्रतिप्रदानमथवा दद्याच्छक्तित आदरात् ।
इति स्मृतेः ।

यद्वा न कोपीति धरातले उपायो लोके वेदे च नास्तीति, अदृश्यत्वादित्यर्थः ॥ २६ ॥

अथ स्वदैन्यमाविष्कुर्वन् प्रार्थयते ।

कश्मलक्रोधग्रस्तोऽहम् इति ।

कश्मलक्रोधग्रस्तोऽहमविद्याग्रन्थिपीडितः
मामुद्धर जगन्नाथ चिरकालस्थ दुःखिनम् ॥ २७ ॥

कश्मलक्रोधाभ्यां ग्रस्तो वशीकृतः ।

तत्र हेतुमाह—

अविद्याग्रन्थिपीडित इति ।

सर्वदोषभूतानादिकर्मात्मिकाविद्याग्रन्थिना पीडितः यन्त्रितः हे जगन्नाथ चिरकालस्यानादिकालस्थ दुःखिनं तं पूर्वोक्तकश्मलादिनुन्नं मामसाधारणकारुण्यादियोगेनोद्धर ।

जगन्नाथेति संबोधनं स्वोद्धरणहेतुद्योतकम् ।

यस्मात्त्वं जगदुद्धारकः ममापि जगदन्तःपातित्वाविशेषादवश्योद्धरणीयत्वमिति भावः ॥ २७ ॥

ननु अन्येपि समुद्धरणहेतव उपायाः शास्त्रेषु प्रसिद्धास्ताननुष्ठाय कृतार्थो भविष्यसीति चेत्तत्राह—

किं करोमीति ।

किंकरोमि क्वगच्छामि त्वत्तो ऽन्यन्न हि दैवतम्
सर्वे स्वार्थपरिभ्रष्टा दृश्यन्ते जगतीतले ॥ २८ ॥

न किंचिदुपायानुष्ठानं कर्तुं शक्तोस्मीति,उपायानां तदनुष्ठातॄणां च स्वातन्त्र्याभावात्, अनुष्ठानेपि अनुग्रहसहायं विना अकिंचित्करत्वाच्च, "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन शृण्वन्तोपि बहवो न विद्यु"रित्यादिना साधनानां व्यभिचारश्रवणात्

तस्मात्त्वमेव शरण्यत्वेन मया वरणीय इत्याह ।

क्वगच्छामीति ॥

तत्रहेतुमाह ।

इति ॥

स्पष्टार्थः ।

ननु अनुग्रहकर्त्तारोप्यनेके ब्रह्मादयः उपास्यत्वेन प्रसिद्धास्तदाश्रितो भूत्वा कृतकृत्यो भव किं मच्छरणेनेत्याशङ्क्याह ।

सर्वे स्वार्थपरिभ्रष्टा दृश्यन्ते जगतीतले ।

इति ।

सर्वेपि ब्रह्मरुद्रेन्द्रादयो देवाः जगतीतले लोकत्रयेपि स्वार्थपरिभ्रष्टाः स्वार्थो भगवत्स्वरूपादिविषयकानुभूतिविशेषः स्मृतिसंतानरूपो वा तस्मात्परिभ्रष्टास्तद्रहिता इत्यर्थः दृश्यन्ते इत्यत्र शास्त्रेष्वितियोजनीये, तथाच ।

प्रजापतिं च रुद्रं चाप्यहमेव सृजामि वै ।
तौ हि मां न विजानीतो मम मायाविमोहितौ ॥

इत्यादिवाक्यात् ।

ब्रह्माद्याः सकला देवा मनुष्याः पशवस्तथा ॥
विष्णुमायामहावर्त्तमोहान्धतमसा वृताः ।
आराध्यं त्वामभीप्सन्ते कामानात्मविशुद्धये ॥

इति वैष्णवे अदितिवचनं च ।

ते परजन्यत्वात् परोपशिक्षितत्वात् परदत्तपरिच्छिन्नैश्वर्यवत्त्वात् कर्मतन्त्रत्वाच्च नाश्रयणीया इति यावत्, स्वस्य त्राणएवाशक्ताः परत्रातृत्वस्य तु का वार्त्तेति भावः. अस्य विस्तरस्तु "नान्या गतिः कृष्णपदारविन्दा"दित्यस्य विवरणे श्रीपुरुषोत्तमाचार्यचरणैर्विशदीकृतत्वादत्रोपरम्यते "अथ ये ऽन्यथा ऽतो विदुरन्ये राजानस्तेक्षय्यलोका भवन्ती"ति श्रुतेः, व्याख्याताचेयं श्रीपुरुषोत्तमाचार्यपादैः, भूमोपासनस्य सार्वज्ञाद्यनवच्छिन्नफलं निरूप्य,

अथोक्तोपासनदाढ्यार्थं परिच्छिन्नोपास्यविषयकपरिच्छिन्नफलकान्यदेवाद्युपासनपरान् मूढान्निन्दति भगवतीश्रुतिः ।

अथेति पक्षान्तरे, अत उपदिष्टसिद्धान्ताद्विपर्ययं देवान्तरमुपास्यत्वेन निश्चितवन्तः कथमिव जानन्तीत्यपेक्षायां ज्ञानस्यानुकरणमाह—

अन्येराजान इति ।

अन्ये ब्रह्मरुद्रादयोऽपि राजानः उपासिताः सन्तो मोक्षदातारः स्वतन्त्रा मोक्षार्थिनोपासनीया इति ते क्षय्यलोका भवन्ति स्वर्गपशुपुत्रादयो जन्मादिलक्षणहेतवो लोकाः फलानि भवन्ति ।

अन्तवत्तु फलं तेषांतद्भवत्यल्पमेधसाम् ।
आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन ॥

इति भगवदुक्तेः ।

किञ्च तेषां क्षेत्रज्ञत्वाविशेषेण मोक्षदातृत्वाऽपरिच्छिन्नैश्वर्यादियोगाभावात् मोक्षदानानर्हत्वं शिवेनैवोक्तं स्वानुभूतं चाह घण्टाकर्णोहरिवंशे ।

अहंकैलाशनिलयमासाद्य वृषभध्वजम् ।
आराध्य तं महादेवमस्तुवं सततं शिवम् ॥
ततः प्रसन्नो मामाह वृणीष्वेति वरं हरः ।
ततो मुक्तिर्मया तत्र प्रार्थिता देवसन्निधौ ॥
मुक्तिम्प्रार्थ्यमानं मा पुनराह त्रिलोचनः ।
मुक्तिप्रदाता सर्वेषां विष्णुरेव न संशयः ॥
तस्माद्गत्वा वदरीं तत्राराध्य जनार्दनम् ।
मुक्तिं प्राप्नुहि गोविन्दान्नरनारायणाश्रमे ॥

इत्यादिना ।

भारते कर्मपारतन्त्र्यमपि स्फुटमेव ॥

युगकोटिसहस्राणि विष्णुमाराध्य पद्मभूः ।
पुनस्त्रैलोक्यधातृत्वं प्राप्तवानिति शुश्रुमः ॥

इति ।

महादेवः सर्वयज्ञे महात्मा ॥
हुत्वात्मानं देवदेवो बभूव ।
विश्वां ल्लोकान् व्याप्यविष्टभ्यकीर्त्या ।
विराजते द्युतिमान् कृत्तिवासाः ।

इति ।

कालपरिच्छेदोपि श्रूयते ।

एको ह वै नारायण आसीन्नब्रह्मानेशान इत्यादि ।

किञ्च "योन्यांदेवतामुपास्ते अन्यो ऽसावन्योऽहमस्मिन् स वेद यथा पशु"रित्यादिना तदुपासकानां पशुत्वश्रवणाच्च, यद्वा

स्वार्थपरिभ्रष्टत्वं नाम स्वार्थपरत्वेन परेषां धर्महानिकर्तृत्वं तत्र सकामानां स्वर्गादिसाधनतपोयोगादिभ्रंशकत्वं कन्दुविश्वामित्रादिचरिते प्रसिद्धं, निष्कामानां साधनभ्रंशे तु तेषां सामर्थ्यमेव नास्तीतिविवेकः, "तस्य ह न देवा नाभूत्या ईशत" इति श्रुतेः, हनेत्यव्ययपदम् अप्यर्थे, देवा ब्रह्मरुद्रादयो ऽप्यस्य निष्कामानन्यभक्तस्य विदुषः अभूत्यै पराभवाय न ईशते समर्था न भवन्तीत्यर्थः, तथापि विघ्नाचरणं तेषां स्वभाव एव परश्रेयोऽसहिष्णुत्वात् "यदेतद्ब्रह्म मनुष्या विद्युस्तदेषां देवानामप्रिय"मितिश्रुतेः ॥ २८ ॥

किञ्च अनन्यशरणत्रातेति ।

अनन्यशरणत्राता रक्षकः शरसंमतः ॥
निरयक्लेशसन्त्रस्त आगतोऽस्मि तवान्तिके ॥ २९ ॥

नान्यः शरणमुपायादिश्रेयोहेतुर्येषां ते ऽनन्यशरणाः स्वपादमूलैकसाधनकास्तेषां त्राता रक्षकः सर्वेषां भक्तानामितिशेषः ।

किञ्चशरसम्मत इति ॥

श्वासात्मना शरति ब्रह्मणो निःशरतीति शरो वेदः "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद" इति श्रुतेः, तस्य सम्मतस्तत्तुल्यः यथा मात्रादेरपि वत्सलतरो वेदो जीवानां पुरुषार्थबोधनेन तद्रक्षकस्तद्वत्, यद्वा शरति निश्शरत्यस्माद्विश्वमिति शरः श्रीभगवान् पुरुषोत्तमस्तत्सम्मतस्तत्तुल्यः तदनुकूलो वेति, तत्र त्राता रक्षक इत्यनयोः सामान्यविषयपरत्वेन पुनरुक्तिर्निरसनीया, तत्र त्रातृत्वं बुद्ध्यादीनां कामादिविषयेभ्यो विमुखीकर्तृत्वं, रक्षकत्वं च बहिःकरणानां शब्दादिभ्यो रक्षणमिति विवेकः,

उक्तलक्षणस्य त्रातुस्तव अन्तिके च चरणयोः छायायामागतोऽस्मि प्राप्तोऽस्मि कुत इत्यपेक्षायां हेतुमाह—

निरयक्लेशसंत्रस्त इति ।

निरये रौरवादौ ये क्लेशा यमकिङ्करयातनोद्भवास्तेभ्यो ऽति-

शयेन त्रासमापन्नः, उपलक्षणंचैतत् जन्ममरणादिलक्षणसंसारचक्रस्य, संसारचक्रभ्रमणाच्च संत्रस्त इति ॥ २९ ॥

वेदनां गर्भसम्बन्धं नाऽऽनामि त्वदनुग्रहात् ॥
तथा साधय मां देव पाहिपाहि कृपानिधे ॥ ३० ॥

हे देव त्वदनुग्रहात् तव कारुण्यादिगुणयोगजन्मप्रसादतः गर्भसंबन्धं जन्मादिजन्यदुःखं वेदनां मरणाद्यवस्थाजन्यं च दुःखं यथा नाऽनामि नानुभवामि तथा मां पाहि पाहि संसारादिति शेषः, अत्यादरे वीप्सा,

कथंरक्षणीयइत्यपेक्षायां तत्प्रकारं प्रार्थयते ।

तथा मां साधयेति ॥

शिक्षयेत्यर्थः ।

रक्षणेहेतुमाह—

कृपानिधे इति ।

स्वाभाविकयावदात्मवृत्तिपरिपूर्णकृपादिसद्गुणानां निधिरनपायिनिवासस्थानं, निधीयतेऽस्मिन्निति निधिरित्यधिकरणव्युत्पत्तिर्वोध्या, तस्य सम्बोधनमेतत्, ननु कृपादिगुणयोगे सत्यपि सामर्थ्याभावे कथं रक्षामीति चेत्तत्रोक्तम्—

देवेति ।

सर्वज्ञाद्यखिलसामर्थ्यसम्पन्नस्त्वमसीति भावद्योतनार्थमिदं द्वितीयं सम्बोधनम् ॥ ३० ॥

ननु "ऋतेज्ञानान्नमुक्तिः" "तमेवविदित्वातिमृत्युमेती"त्यन्वयव्यतिरेकश्रुतेः, यद्वा "भक्तिरेवैनं दर्शयती"त्यादिश्रुतेः, परया भक्त्यैव श्रेयः प्राप्तिरिति, ते च ज्ञानभक्ती बुद्धिशुद्धिसापेक्षे, बुद्धिशुद्धिश्च स्ववर्णाश्रमोचितधर्मानुष्ठानेन, धर्मानुष्ठानं शास्त्रोक्तविध्यपेक्षितमिति वैदिकानां प्रक्रिया, तथा च विधिनिर्णीतस्ववर्णाद्यनुकूलधर्मानुष्ठानेनान्तःशुद्धिं सम्पाद्य ज्ञानभक्त्येकतरेण मुक्तः स्याः किं मच्छरणेनेति चेत्तत्राह—

विध्यविधी न जानामीति ।

विध्यविधी न जानामि न जानामि त्वदर्चनम् ॥
स्वीयानुग्रहभावेन मनःकामं प्रपूरय ॥ ३१ ॥

अयं विधिस्तेनायं धर्मो विधेयः अयमविधिर्निषेधस्तेनायमधर्मो निषिद्ध इत्येतदहं न जानामि तथाभूतं ज्ञानं नास्तीत्यर्थः, यदि तद्विषयकज्ञानमेव नास्ति, तर्हि तदनुष्ठानस्य का वार्त्तेति भावः, ननु कर्मणो दुर्ज्ञेयत्वात् "गहना कर्मणो गति"रिति भगवद्वचनात्, तथापि अर्चनादेः सौकर्यात्तदेवानुष्ठेयं, तस्यापि श्रेयोमूलत्वादिति चेत्तत्राह,

नजानामि ।

त्वदर्चनविषयकज्ञानस्यैवाभावस्तदनुष्ठानस्य तु को वा प्रसङ्ग इत्यर्थः, ननु साधनाभावे कथमिव फलसिद्धिरित्याशङ्क्याह—

स्वीयानुग्रहभावेन मनःकामं प्रपूरयेति ।

स्वीयश्चासावनुग्रहश्च स्वीयेष्वनन्यभक्तेषु वाऽनुग्रहस्तस्य भावो विषयता तेन स्वीयानुग्रहविषयीकरणेनेति यावत्, मनःकामं कास्यते मुमुक्षुभिरिति कामः श्रीभगवद्भावापत्तिलक्षणो मोक्षः मनःकामशब्दाभिधेयस्तं सर्वेषां साधनानां तवानुग्रहकिंकरत्वात् तेनैव सर्वसिद्धिः सुलभेति तात्पर्यार्थः, "यमेवैष वृणुते तेन लभ्यः" "तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मन" इत्यादिश्रुतेः, ननु साधनान्तराभावे ऽनुग्रहमात्रेण सिद्ध्यङ्गीकारे नैर्घृण्यादिदोषप्रसङ्गात्साधनविषयकशास्त्रव्याकोपाच्चेति चेत्सत्यं, त्वदनुग्रहयोगात् तत्क्षणमेव सर्वसाधनसम्पत्तेः सम्भवात् उभयोरपि साधनसाध्ययोस्त्वदनुग्रहप्रयुक्तत्वादिति ब्रूमः, यथा स्तनन्धयबालस्य रोगापत्तौ औषधभक्षणानर्हत्वेन तन्मात्रौषधभक्षणादेवौषधभक्षणरोगनाशौ तत् स्तनपानेनैव भवतः, तथा सर्वसाधनानुष्ठानानर्हस्यापि मम त्वदनुग्रहेणैव साधनसाध्ययोः सिद्धिः सम्भवत्येवेति भावः ३१ ॥

सर्वसाधनहीनत्वं दर्शयन् प्रार्थयतेद्वाभ्यां—

नियताचारहीनोहमिति ।

नियताचारहीनोऽहं कामुको लोभलम्पटः ॥
नियमानन्ददासोऽयमित्याकर्ण्य गिरां प्रभो ॥ ३२ ॥
यथा न लज्जसे धीमन् तथा सम्पादय क्रमात् ॥
तवावतारो भूतानां लोकद्वयविधायकः ॥ ३३ ॥

"अहरहः संध्यामुपासीत" "यावज्जीवमग्निहोत्रं जुहोती" इत्यादिविधिना विहितो धर्मो नियताचारस्तेन हीनो ऽस्मि ।

नियतस्य तु सन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः ।
सन्ध्याहीनो ऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।

इत्यादिनिषेधस्य विषयोऽस्मीतिभावः ।

अत एव कामुको लोभलम्पटइति ।

शुद्धिहेतुभूतधर्मयोगाभावात् प्रत्युत तत्प्रतिभटकामलोभादियोगात् सर्वपापिष्ठाधिराजो नरकनिष्ठाहोंस्मीति भावः, ।

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ।

इतिभगवदुक्तेः ।

ननु यद्येवंभूतोऽसि तर्हि—

अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।

इत्यादिशास्त्रात्स्वकृतं त्वया ऽवश्यं भोक्तव्यमेव कथं मया ऽनुग्रहणीय इत्याशङ्क्य स्वस्य लज्जानिवारणार्थमित्याह ।

नियमानन्ददासोऽयमिति ।

अयममुको नियमानन्दस्य सर्वज्ञसर्वशक्तिविष्णुरूपस्य दासो भूत्वा कामादिदोषग्रस्तत्वान्नरकं प्राप्स्यते इति या लोकानां गिरा

राज्ञि चामात्यदोषाः स्युः पत्नीदोषाश्च भर्त्तरि ।
तथा शिष्यार्जितं पापं गुरुं प्राप्नोति निश्चितम् ।

इति शास्त्रीया च या गिरा तामाकर्ण्य श्रुत्वा त्वं यथा न लज्जसे लज्जां न गच्छसि तथा मां क्रमात्सम्पादय, आ-

क्तिदानादिभिः पूरणीयोऽहं भवता, हे प्रभो हे धीमन् इति सम्बोधनाभ्यां सर्वसामर्थ्यसार्वज्ञादिपराभ्यां समर्थानां सर्वज्ञानां स्वाकीर्त्तिगिराश्रवणमतिदुःसहमिति सूचयति, अस्माकं तु न दोषावहं निरयप्राप्तिश्रवणवत् दुःखहेतुत्वं नास्ति नुकूल्यसङ्कल्पादिषडङ्गान् सम्पा(१)दयित्वा स्वात्मसात्कृत्वा परभः परं तु भवतोऽकीर्त्तिश्रवणमस्माकमपि दुःसहमेव, अतो ममानङ्गीकारे उभयत्राऽनिष्टतमो दोषयोगः, अङ्गीकारे च उभयत इष्टयोगः इतिविचार्य स्वकीर्त्तिलाभाय चाहमवश्यमनुग्रहणीय इतिभावः, यद्वा ननु स्यादेतद्यदि तथाभूताधमोद्धरणे मम शक्तिः स्यान्न तु साऽस्ति तस्मादकीर्त्तिश्रवणोद्भवं दुःखं मयाऽवश्यं सोढव्यमित्याशङ्कामुक्ताभ्यां सम्बोधनाभ्यां निराकरोति हे प्रभो सर्वसामर्थ्याश्रय हेधीमन् सर्वज्ञानाश्रय तव किञ्चिदप्यशक्यं नास्तीतिभावः।

ननु सर्वशक्त्यादियोगेपि किमिति आत्मसात्करणीयोऽसि हेत्वभावादित्याशङ्क्याह ।

तवाऽवतारो भूतानां लोकद्वयविधायक इति ।

लोकद्वयविधानं चात्र निःश्रेयोभिकाङ्क्षिणां साधनसाध्यरूपयोगक्षेमवहनमेव बोध्यम् ॥ ३२ ॥ ३३ ॥

एवं प्रार्थितेन श्रीमदाचार्येण ऽऽत्मसात्कृतमात्मानमाकलय्य स्वभाग्यमभिनन्दन्नाह—

धन्योस्मीत्यादिना ।

धन्यो ऽस्म्यनुगृहीतोऽस्मि विष्णुना प्रभविष्णुना ॥
यच्छिरसि स्थितं नाम नियमानन्द इत्यपि ॥ ३४ ॥

अहं धन्योऽस्मि सफलजन्माऽस्मि कृतकृत्य इति यावत् कृत्यशेषाभावात् किमत्रकारणमित्याशङ्क्याह ।

विष्णुना ऽनुगृहीतोस्मीति ।

विष्ण्वनुग्रह एव कृतार्थत्वे हेतुरिति भावः ।

अथ विष्णोर्विशेषणम्—

प्रभविष्णुनेति ।

प्रभवनशीलेनेति "बहुस्यां प्रजायेय"इति श्रुतेः. यदि विष्णोरनु-

(१) सम्पादयित्वेतिपाठः प्रमादिकः, सम्पाद्यइति तु भवितुं युक्तम् ।

गृहीतो न स्यां तर्हि एतादृशदुर्लभस्य लाभो मम मन्दभाग्यस्य दुष्प्राप्यः स्यादित्यर्थः, ।

तदनुग्रहस्यैव को वा ज्ञापक इत्यपेक्षायामाह—

यच्छिरसि स्थितं नाम नियमानन्द इत्यपीति ।

यस्य पूर्वोक्तदोषाद्यसाधारणाश्रयस्यापि मम शिरसि नियमानन्द इति नाम स्थितमस्ति नियमानन्द दास इति लौकिक्यामपि वाण्यां नियमानन्द इति शब्दस्य नित्यसंबन्धो ज्ञात, एष नित्यसंबन्धः श्रीभगवदनुग्रहं विना दुर्लभ इत्यर्थः, यदि नाम संबन्धमात्रेणापि कृतार्थोस्मीति तर्हि पूर्णानुग्रहेण कृतार्थः स्यामिति किं वक्तव्यमिति कैमुत्यन्यायसूचको ऽत्रापीति शब्दः, यथा लोके राज्ञो नामाङ्कितपत्रधारिणमपि पुमांसं लोका बहु मन्यन्ते किं पुनः साक्षात्संबन्धेन तद्वत् प्रकृतेरपीति भावः ॥ ३४ ॥

अथ हर्षभरेण पुनस्तद्गुणान्वर्णयन् स्तौति ।

देवनद्यां समाश्लिष्ट इति ।

देवनद्यां समाश्लिष्टः शोभी सर्वाङ्गसुन्दरः ॥
निःस्पृहो निर्ममः शान्तः पूर्वाचारसमन्वितः ॥ ३५ ॥

देवनदी गोदावर्याख्या गङ्गा तस्यां सम्यक् स्नातः ।

किंच शोभीति ।

शोभास्यास्तीति शोभी,

तदेव दर्शयति

सर्वाङ्गसुन्दरः,

अङ्गप्रत्यङ्गनिरतिशयसौन्दर्याश्रयः, लावण्यमाधुर्यादीनामप्युपलक्षणमेतत् ।

एवं रूपाश्रितगुणानुक्त्वा स्वरूपगुणानाह—

निःस्पृह इति ।

स्वभावतो निर्गता स्पृहा यस्मात्सः आत्मरतित्वेनाप्तकामत्वाच्च "आत्मरतिरात्मक्रीड" इत्यादिश्रुतेः,

किञ्च निर्मम इति ।

ममकारास्पदस्य भगवदात्मकत्वेन तदीयत्वनिश्चयात्, ।

द्व्यक्षरं तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम् ।
ममेति च भवेन्मृत्यु र्न ममेति चशाश्वतम् ।
इतिसूत्रकारोक्तेः ।

किञ्चशान्त इति ।

संयतचित्तमनाः नित्यमुक्तत्वेन क्षोभादिहेतुप्रकृतिसम्बन्धास्पृष्टमाहात्म्यात् ।

किञ्च पूर्वाचारसमन्वित इति ।

पूर्वेषां श्रीसनत्कुमारनारदादीनामाचारः श्रीपञ्चरात्रनिरूपितभागवतधर्मस्तेन समन्वितः, तदनुष्ठानतत्परः लोकसंग्रहार्थमिति शेषः, तदर्थमेवावतारत्वात् , ॥ ३५ ॥

किञ्चगम्भीरमतिः ।

गम्भीरमतिर्गोस्वामी स्वाश्रयाणां सुखावहः ॥
द्वन्द्वातीतस्वभावश्च कार्पण्यहरणोत्सुकः ॥ ३६ ॥

गम्भीरा इयत्तावच्छेदेनाकलयितुमशक्या कुतर्कैर्मतिर्यस्य सः अक्षतज्ञानत्वात् ।

किञ्चगोस्वामीति ।

गवामिन्द्रियाणां स्वामी स्ववशकर्तृत्वात् , यद्वा गवां श्रुतीनां स्वामी तदुक्तार्थप्रवर्त्तकत्वात् गोः पृथिव्या वा स्वामी तद्धारभूताधर्मिनाशकत्वेन तद्रक्षकत्वात् ।

किञ्च स्वाश्रयाणां सुखावहइति ।

स्वमेव भगवांच्छ्रीमदाचार्य आश्रय उपायोपेयसम्बन्धादिरूपो येषां ते स्वाश्रया अस्मदादयः तेषां सुखं परमनिःश्रेयोलक्षणमावहति प्रापयतीति तथा ।

किञ्च द्वन्द्वातीतस्वभावश्चेति ।

द्वन्द्वानि शीतोष्णसुखदुःखानि तान्यतिक्रम्य स्थितः स्वभावो यस्य सः ।

किञ्चकार्पण्यहरणोत्सुक इति ।

स्वाश्रितानां कार्पण्यम् अनात्मज्ञत्वं "यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति स कृपण" इति श्रुतेः, तस्य हरणे नाशने उत्सुकः सदोद्युक्तः ॥ ३६ ॥

किञ्च वेदाध्ययनविख्यात इति—

वेदाध्ययनविख्यातः परमार्थपरायणः ।
श्रीकृष्णप्रियदासश्च श्रीकृष्णे कृतमानसः ॥ ३७ ॥

वेदाध्ययनं जगति विख्यातं येन सः ।

परमार्थपरायणः ।

"परमार्थस्त्वमेव" इतिस्मृतेः परमार्थः परमपुरुषरूपः सर्वज्ञो जगज्जन्मादिहेतुर्मुक्तोपसृप्यो मुमुक्षुध्येयो ब्रह्मरुद्रेन्द्रादिवन्दितपादपीठः शास्त्रयोनिर्मुकुन्दो भगवांश्छ्रीकृष्णः स्वतन्त्रसत्ताश्रय एवोत्कृष्टमयनं निवासस्थानं यस्य सः सदैव तत्करस्थत्वात्, यद्वा अयनं आश्रयो निष्ठास्पदं यस्य सः यद्वा परायणं प्राप्यं यस्य सः ।

तत्र हेतुमाह ।

श्रीकृष्णप्रियदास इति ।

दासेषु प्रियदासः श्रीकृष्णस्य प्रियदासस्तथोक्तः, यद्वा प्रियश्चासौ दासश्चेति तथोक्तः प्रेष्ठप्रेष्ठतमत्वयोरप्युपलक्षणं सर्वसम्बन्धाश्रयत्वात्,

अत एव श्रीकृष्णेकृतमानस इति ।

श्रीकृष्णे कृतं स्थापितं मानसं मनो येन सः एतेन तदनुयायिभिरपि मनः श्रीकृष्ण एव योजनीयमिति सूचितम् ॥ ३७ ॥

किञ्च वैष्णवैः श्लाघनीय इति ।

वैष्णवैः श्लाघनीयश्च वैष्णवानां प्रियङ्करः ॥
वैष्णवप्रियसर्वार्थो वैष्णवैकपरायणः ॥ ३८ ॥

वैष्णवैर्विष्णुदेवताकैस्तदन्याश्रितैः साधुभिः साम्प्रदायिकैः स्तवनार्चनादिविषयीकर्त्तुं योग्य इत्यर्थः, ।

तत्र हेतुमाह ।

वैष्णवानां प्रियंकर इति ।

स्वप्रियकर्त्ता ऽवश्यमेव पूज्य इत्यर्थः ।

किञ्च वैष्णवप्रियसर्वार्थ इति ।

वैष्णवानां प्रियाः प्रेमविषयाः सर्वेऽप्यर्था आचारविशेषा यस्य सः, यद्वा सर्वश्चासावर्थः पुरुषार्थश्च सर्वार्थः वैष्णवानां प्रियश्चासौ सर्वार्थश्चेति विग्रहः, ।

तत्रहेतुः,

वैष्णवैकपरायण इति ।

वैष्णव एव एकं मुख्यं परमुत्कृष्टमयनं निष्ठाविषयो यस्य सः वैष्णवशब्दो ऽत्र विष्णोराराधनाख्यो धर्मो विवक्षितः, तस्यैव वैष्णवानां मुख्योत्कृष्टनिष्ठाविषयत्वात्, यद्वा विष्णोर्भावो वैष्णवस्तद्भावापत्तिलक्षणो मोक्षो विवक्षितः, मुक्तगम्यत्वात्, यद्वा विष्णोरिदं वैष्णवं वैकुण्ठाख्यं मुक्तप्राप्यं परमं धाम तदेव मुख्यमुत्कृष्टं निवासस्थानं यस्येतिविग्रहः, यद्वा वैष्णवानामेकं प्रधानं परं केवलमाश्रयत्वादयनं शरणं यस्य स तथोक्तः ॥ ३८ ॥

किञ्च वैष्णवोद्वेगहारीचेति—

वैष्णवोद्वेगहारी च सदा वैष्णवदुःखहा ॥
शोभाढ्यो वैष्णवाकीर्णः शोभते उडुराडिव ॥३९॥

वैष्णवानामुद्वेगः संशयविपर्ययमूलभूतो बुद्धिदोषस्तं हरणशीलः यद्वा उद्वेगः कदा प्राप्स्यामः कदा चक्षुषा साक्षात् पश्याम इत्यादिस्वरूपकः, यद्वा संसारचक्रभ्रमणासाधारणहेतुरात्मविषयकलक्षणो ऽविवेक उद्वेगशब्दाभिधेयस्तं हरणशीलः, यद्वा

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।

इत्यादिश्रीमुखोक्तेः, परेभ्य उद्विजनं परोद्वेजनं वा उद्वेगः स्वभावविशेषस्तं हरणशीलः, चकारात् उद्वेगादिकारणानादिदैवीमायासम्बन्धनिवारकोऽपीति ज्ञेयम्, अत एव

सदावैष्णवदुःखहेति ।

वैष्णवानां दुःखं हन्तीति तथा सः, दुःखं मोक्षप्रतिबन्धकमनादिकर्मरूपं बोध्यम्, सर्वदुःखमूलत्वात्, ।

किञ्च शोभाढ्य इति ।

प्रपन्नरक्षणरूपस्वाराज्यश्रियाभिषिक्तः श्रीभगवदनवच्छिन्नानुभूतिलक्षणशोभासम्पन्नो वा वैष्णवाकीर्णः शोभतइति, वैष्णवैः स्वाश्रितैः साम्प्रदायिकैरावृतः विराजते इति,

अत्र दृष्टान्तमाह ।

उडुराडिवेति ।

तारागणैरावृतो निशाकरो यथा शोभते तद्वत् ॥ ३९ ॥

अथात्मदैन्यकथनपूर्वकं तस्य महिम्नो ऽपरिच्छिन्नत्वेन दुर्ज्ञेयत्वं व्यञ्जयन्स्तौति ।

बालइत्यादिना ।

बालो लाल्यस्त्वया स्वामिन् देशकालविमोहितः ॥
न जानामि न जानामि कीदृशो महिमा तव ॥४०॥

हे स्वामिन् अहं त्वया लाल्यः अनुकम्पनीयः कीदृशोऽहं बालस्तत्रापि देशकालविमोहितइति ।

देशकालादिविषयकमोहाश्रयः देशकालादिविवेकशून्यत्वादेवानुकम्प्य इत्यर्थः,

यदि देशकालादीनामेव ज्ञानं नास्ति तर्हि त्वन्महिमविषयकज्ञानाभाव इति का वार्त्तेति कैमुत्यं सूचयन्नाह ।

न जानामीति ।

कीदृशो महिमा तवेति कीदृशः किम्प्रकारकः केनोपमानीकर्त्तुमहं कियान् वा परिमाणत इति को वा स्वरूपत इति न जानामि अज्ञानोत्कर्षद्योतनाय वीप्सा ॥ ४० ॥

अथात्माभिप्रेतं विज्ञापयन् ग्रन्थमुपसंहरति—

लघुस्तवेनेति ।

लघुस्तवेन भो नाथ भो आचार्यशिरोमणे ॥
दासोऽयमिति मां ज्ञात्वा भक्तिं देहि पदाम्बुजे॥४१॥
इति श्रीवैष्णवाचार्यश्रीनिवासाचार्यविरचितं ॥
लघुस्तवराजस्तोत्रं सम्पूर्णम् *

लघुनि मिताक्षरपदानि यत्र स लघुः सचासौ स्तवस्तेन स्तुतिव्याजमात्रेणेति भावः, यद्यपि बालबुद्धित्वात् मम महिमवर्णनज्ञानानधिकरणं तथाप्ययं मम दासः दासत्वेन जगति विख्यातस्तस्मान्मया ऽऽत्मसात्करणीय इति मां ज्ञात्वा स्वपदाम्बुजे भक्तिं देहीति वाक्यार्थः ।

तत्रानुग्रहविशेषे त्वरां प्रार्थयन्संबोधयति ॥

भोनाथइति ।

"नाथृयाच्ञोपतापैश्वर्याशीःषु" ज्ञानभक्त्यादियाच्ञापादानभूतः परिपूर्णैश्वर्यो वा नाथपदार्थो विवक्षितः, तत्र प्रथमव्याख्यानेन ज्ञानभक्त्यादेः प्रार्थना द्वितीयेन तद्दानयोग्यरूपसामर्थ्याविष्कार इति विवेकः,

ननु स्यादेतत् भक्त्यादीनां दातृत्वं तद्दानादिशक्त्याश्रयत्वयोगश्च यदि कश्चिदन्यो मत्समोऽभ्यधिको वा आचार्यान्तरो न स्यान्नत्वेतदस्तीत्याशङ्क्य सम्बोधनान्तरमाह—

भो आचार्यशिरोमणे इति ।

आचार्येषु मुख्यस्त्वमेव सम्प्रदायप्रवृत्त्यर्थावतीर्णत्वात् अन्येषां तु तव मतैकदेशानुयायित्वादिति आचार्यशिरोमणित्वप्रयोगाभिप्रायः, ॥ ४१ ॥

श्रीश्रीनिवासगिरिजा ह्याद्याचार्याधिगामिनी ।
श्रेयस्तनोतु साधूनां गुरुभक्तिसरिद्वरा ॥ १ ॥
श्रीगुर्वनुग्रहो ध्येयः संसाराब्धेश्च कुम्भजः ।
अज्ञानतमसो भानुर्मुक्तिदाने हरिर्यथा ॥ २ ॥
वन्दे श्रीनियमानन्दं नियमेन निजाश्रितान् ।
आनन्दयन्तमाचार्यं चक्ररूपिणमीश्वरम् ॥ ३ ॥
वैकुण्ठाब्धिसमुद्भूतः श्रीनिवासार्यचन्द्रमाः ।
मताम्बुद्धौ जयत्यद्धा कर्मतापतमोपहः ॥ ४ ॥

हरिः ॐतत सदिति श्रीहयग्रीवानुग्रहजीवनेनस्वभूदेवपदान्याश्रितेनपुरुषोत्तमप्रसादाख्येन वैष्णवेन विरचिता गुरुभक्तिमन्दाकिनी समाप्ता ।

(१५) शिवस्तात्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः जैमिनीयब्रह्मदशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि—मीमांसादर्शनम् । महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् श्रीशङ्करभट्टकृता मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः । (वेदान्तः) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् । १३

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितं सम्पूर्णम् (वेदान्तः) ३

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीतिप्रसिद्धया समेतम् । (वेदान्तः) १४

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता १

(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्याऽवतरणिकया च सहितम् ८

(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्तः) ... ३

(२५) क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि ... ३

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २

(२७) षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसुरिकृतः । १

(२८) शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च १

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका । १३

(३०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा—संस्कारप्रकाशात्मकः । सापिण्ड्यदीपकश्च ११

(३१) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ६

(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः ४

(३३) वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । २

(३४) प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितः ... २

(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १

(३६) योगदर्शनम् । परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित—योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम् । २

(३७) वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृत ब्रह्मामृतवर्षिणीसमाख्यव्याख्यासंवलितम् । ४

(३८) विश्वप्रकाशः । कोशः । विद्वद्वरश्रीमद्वेश्वरसूरिविरचितः । २

(३९) श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचितटिप्पणीसहिता । श्रीमद्भागवतदशमस्कन्धजन्मप्रकर्ण श्रीसुबोधिनीटिप्पण्योः—प्रकाशः गोस्वामि श्रीश्री पुरुषोत्तमजीमहाराज विरचित ३

(४०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः । ४

(४१) वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः । वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद शर्म्मकृता अध्यात्मसुधातरङ्गिण्याख्यटीकयासहिता ३

(४२) स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमविरचितः । स्वकृतटीकाविभूषितश्च । १

(४२) याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्य-व्याख्यासमलङ्कृतमिताक्षरासहिता । व्यवहाराध्यायः ११

(४४) गादाधरी । श्रीगदाधरभट्टाचार्यचक्रवर्तिकृता । श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता । ४

(४५) शास्त्रदीपिका । श्रीपार्थसारथिमिश्र प्रणिता । रामकृष्णविरचितयुक्तिस्नेहप्रपूरण्याख्यव्याख्यया सहिता तर्कपाद । ५

(४६) वैयाकरणसिद्धान्तलघुमञ्जूषा महामहोपाध्याय-श्रीनागेशभट्टविरचिता । श्रीमद्दुर्बलाचार्य-बालम्भट्टाभ्यां विरचितकुञ्जिकाकलाह्वटीकाद्वयसंवलिता। ११

(४७) व्याकरणसिद्धान्तसुधानिधीः । पर्वतीय विश्वेश्वरसूरिविरचितः । ८

(४८) विरमित्रोदयः । लक्षणप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः। ७

(४९) बृहदारण्यकवार्त्तिकसार श्रीमद्विद्यारण्यस्वामिविरचितः । महेश्वरतीर्थकृतयालघुसंग्रहाख्यया टीकया समलंकृतः । ६

(५०) वीरमित्रोदयः । राजनीतिप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ५

(५१) पूर्वमीमांसा अधिकरणकौमुदी । श्रीमन्महामहोपाध्याय पं० रामकृष्णभट्टाचार्यवीरचिता परिशिष्टाधिकरणनिरूपणपूर्वकं टिप्पण्या परिष्कृत । १

(५२) प्रसस्तपादभाष्यटीकासंग्रहः । तत्र कणादरहस्यम् । श्रीशंकरमिश्रविरचितम् १

(५३) क्रमदीपिका । श्रीमन्महामहोपाध्याय काश्मीरिककेशवभट्टविरचिता । विद्याविनोदश्रीगोविन्दभट्टाचार्यकृतविवरणोपेत ३

(५४) वीरमित्रोदयः । तीर्थप्रकाशः । महामहोपाध्याय श्रीमित्रमिश्रविरचितः । ६

(५५) सांख्यसंग्रहः । तत्र सांख्यतत्त्वविवेचनम् श्रीषिमानन्द (क्षेमेन्द्र) विरचितम् । सांख्यतत्त्वयाथार्थ्यदीपनम् भावागणेशविरचितम् । समाससूत्रव्याख्या सर्वोपकारिणी च । २

(५६) न्यायपरिशुद्धिः । श्रीमद्वेङ्कटनाथ श्रीवेदान्ताचार्यप्रसादिता । श्रीनिवासाचार्यविरचित न्यायसारसमाख्यया टीकया युता । २

पत्त्रादिप्रेषणस्थानम् } हरिदासगुप्तः, चौखम्बा बनारस सिटी